॥ ओ३म् ॥

यद्धात्रा निजभालपट्टलिखितं
स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां
मेरौ ततो नाधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां
वृत्तिं वृथा मा कृथाः।
कूपे पश्य पयोनिधावपि घटो
गृह्णाति तुल्यं जलम् ॥४९॥
(नीतिशतकम्)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

त्वमेव
चातकाधारोऽसीति
केषां न
गोचरः।
किमम्भोदवरास्माकं
कार्पण्योक्ति
प्रतीक्षसे ॥५०॥
(नीतिशतकम्)

卐 वर्षम्-११ 卐 अंकः-०३ (२४३) 卐 १ अगस्तमासः २०२१तः १५ अगस्तमासः २०२१ पर्यन्तम् 卐 विक्रमसंवत्-२०७८ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२१ 卐 पृष्ठम्-८

## भारतं करिष्यति समग्रजगतः नेतृत्वम्-स्वामिरामदेवः

हरिद्वारम्, 24/07/21। पतंजलियोगपीठे गुरुपूर्णिमामहोत्सवः ऋषिज्ञानपरंपरया समाचर्यते। तत्र पूज्य स्वामी रामदेवः अवोचत् यत् पतंजलिमाध्यमेन ऋषि-मुनीनां प्राचीनपरंपराणां स्थापनाद्वारा विश्वस्य सर्वोकृष्टायाः आध्यात्मिकशक्तेः भारतस्य निर्माणं जायते।यत्र पञ्चोपदेशे अष्टाध्यायी, धातुपाठः, योगदर्शनं, व्यासभाष्य इत्यादिभिः सहितेषु, गीता, उपनिषद्, पंचदर्शनं, व्याकरणं



महाभाष्यं चेत्यादिषु छात्राः अत्र पारंगताः क्रियन्ते। पतंजलिगुरुकुलं, पतंजलिविश्वविद्यालयश्च दशसहस्रविद्यार्थिभिः प्रारभ्य एकलक्षविद्यार्थिनः यावत् प्राप्तः वर्तते। लक्ष्यम् आगामिदशवर्षेषु पूर्णतां गच्छेत्। आचार्यः बालकृष्णः अकथयत् यत् स्वामी विरजानंदतः महर्षि दयानंदतश्च चल्यमाना गुरु-शिष्यपरंपरा अग्रे वर्धते। पतंजलियोगपीठतः राष्ट्रनिर्माणस्य यज्ञः चलति। दुर्भाग्यतः शास्त्रज्ञानं दुर्लभं । शास्त्र श्रवणस्य अष्टाध्याय्याः, वेदस्य, उपनिषदां, श्रीमद्भगवदगीतायाः कण्ठस्थीकर्तघ्णाम् अभावः आसीत् परन्तु स्वामिनः प्रयासेन लघुबालाः एतत् सर्वं श्रावयन्तः लक्ष्यन्ते।

तत्र उभाभ्यां समेभ्यः गुरुपूर्णिमायाः शुभकामनाः दत्ताः।

कार्यक्रमे पतंजलिवैदिकगुरुकुलस्य, पतंजलि वैदिक कन्या गुरुकुलस्य , पतंजलि गुरुकुलम् देवप्रयागस्य, पतंजलि गुरुकुलम्-योगग्रामस्य, पतंजलि बाल गुरुकुलस्य , पतंजलि विश्वविद्यालयस्य छात्राणां द्वारा पंचोपदेशैः- अष्टाध्याय्या, धातु पाठेन, योग दर्शनेन, व्यासभाष्येन सहितानां, गीतायाः, उपनिषदां, पंचदर्शनानां, व्याकरणस्य ,महाभाष्यस्य च श्रवणं कृतम्। विजेतृभ्यः

शेषभागःतृतीयेपुटे

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः रामटेकम् तथा वेद-वेदान्ताध्ययनशोधसंस्था, नवदेहली अनयोः संयुक्ततत्त्वावधाने समायोजितायाः दशदिवसात्मिकायाः 'संस्कृतपद्यरचना' इत्यस्याः अन्तर्जालीयकार्यशालायाः (२१ जुलै, २०२१ तः ३१ जुलै, २०२१ पर्यन्तम्) समापनसत्रम्




अध्यक्षः-प्रो.श्रीनिवासः वरखेडी, मा.कुलगुरुः,कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः, रामटेकम्

सारस्वतातिथिः- शतावधानी डा. आर् गणेशमहोदयः,बेङ्गलूरु.

विशेषोपस्थितिः- प्रो. मधुसूदन पेन्ना

अधिष्ठाता- भारतीयधर्म-तत्त्वज्ञान- संस्कृतिसंकायः

कविकुलगुरु-कालिदास-संस्कृत- विश्वविद्यालयः, रामटेकम्

प्रबोधकाः

प्रो.नन्दा पुरी, प्रो.परागः जोशी, डा. रामकृष्णपेजत्तायः, डा.वेङ्कटेश कुलकर्णी, डा. अरविन्दतिवारी, श्री के.जि.महेशः, श्री शशिकिरणः, श्री उमामहेश्वरः, श्रीसूर्यहेब्बारः।

कार्यक्रमसंयोजकौः-

प्रो.कविता होले-विभागाध्यक्षा-संस्कृतभाषा-साहित्यं च

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः,रामटेकम्

डा. धनञ्जय रावः - निदेशकः, वेद-वेदान्ताध्ययनशोधसंस्था, नवदेहली

## उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ द्वारा २४ जुलाई २०२१ गुरुपूर्णिमायां सत्रद्वये संस्कृतकविसम्मेलनं समायोजितम्। यत्र सप्तदश कवयः मनोहरं काव्यपाठमकुर्वन्। संचालनं डा. अरविन्दकुमारतिवारी कृतवान्, अयमपि काव्यपाठमकरोत्।




## मिथ्यारोपेण पीड्यते संस्कृतमहाविद्यालयस्य प्रभारी प्राचार्यः



हरिद्वारम्। अप्रमाणितप्रपत्राणाम् आधारेण संस्थायाः अभिग्रहणप्रकरणे आरोपितः भगवानदाससंस्कृतमहाविद्यालयस्य प्रभारिप्राचार्यः निरंजन मिश्रः आरक्षिभिः गृहीतः। अभियोगेस्मिन् उत्तराखंडसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना सहिताः षड् शिक्षाविदः सूचीबद्धाः। आरक्षिणामनुसारम् अवधूतमंडलाश्रमस्य स्वामी रुपेंद्र प्रकाशः ज्वालापुरारक्षिस्थले विवरणीम् अदात् यत् 14 /062019 तमे दिनाङ्के 17/11/ 1965 संस्कृतस्य, साहित्यस्य च विभिन्नशाखानुरूपं शिक्षां दातुं सामाजिकसेवायाः धर्मसदाचारस्य च प्रचाराय श्रीभगवानदाससंस्कृत महाविद्यालयस्य स्थापना जाता। यत्र गुरुचरण दासः, गोविन्द प्रकाशः, स्वामी हंस प्रकाशः, लाला भगवानदास कत्यालः, हरेन्द्र कुमार कत्यालः, नरसिंह दासः, सोन्धी फूल स्यालश्च पदाधिकारिणः सदस्याश्च मनोनीताः। प्रबंधककार्यकारिणी 1965 तः 1985 पर्यन्तं सुचारुरूपेण कार्यभारं स्वीकृत्य संचालनं कुर्वती आसीत। आरोप्यते यद्विनय बगाई, प्रो. महावीर अग्रवालः (वर्तमानः अध्यक्षः)अजय चोपड़ा, डा. अरविन्द नारायण मिश्रः, डा. शैलेन्द्र कुमार तिवारी, डा. भोला झा च परस्परं सम्मिल्य षड्यंत्र रचित्त्वा 1985 तः 2018 पर्यन्तं श्रीभगवानदाससंस्कृतमहाविद्यालयस्य, प्राचीन-अवधूतसंस्कृतमहाविद्यालयस्य, प्राचीनअवधूतमण्डलाश्रमसमितेश्च संविधानं (नियमावलीं) विरुद्धय बिना काञ्चन विधिककार्यवाहीं पदाधिकारिणां मिथ्याहस्ताक्षराधारेण समितिम् पर्यवर्तयन् । आरोपः अस्ति यत् संस्थां ग्रहीत्वा आरोपिभिः अनैतिकलाभं प्राप्तुं संस्थायै राज्यकेन्द्रसर्वकारतःअनुदानं प्राप्तुं पंजीकृत्य धनं प्राप्तम्।

विध्यवलोकने अधिकारिणा (एसएसआई) किशोरग्वाडीद्वारा महाविद्यालयस्म प्रभारी प्राचार्य निरंजन मिश्रः गृहीतः। प्रकरणेस्मिन् उत्तराखंडसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिमहावीर अग्रवालः, डॉ. भोला झा न्यायालयतः प्राचार्यचरं मोचयितुम् अभ्यर्थनाम् अकुर्वाताम्।

# पुरस्कारप्राप्तसंस्कृतविद्वद्भ्यः बसयाने निर्भाटकं यात्रासौविध्यम्



**चंडीगढम्।** संस्कृतभाषायां विभिन्नपुरस्कारप्राप्ताः हरियाणायाः विद्वांसः बसयाने निशुल्कं यात्रा करिष्यन्ति। भविष्यति पुरस्कारप्राप्तं करिष्यमाणाः विद्वांसः अपि सुविध ामिमां प्राप्स्यन्ते।

मुख्यमंत्री मनोहर लालः प्रस्तावं स्व्यकरोत् हरियाणासंस्कृताकाद-मीनिदेशकः डॉ. दिनेश शास्त्री अकथयत् पुरस्कारप्राप्तेभ्यः विद्वद्भ्यः महत् सम्मानं भविष्यति । लिखितादेशे निर्गते सति बसयाने किराया न दातुं शक्ष्यते । मुख्यमंत्री प्रस्तावः संस्कृतमहाविद्यालयेषु, गुरुकुलेषु, अध्यापनकार्यं कुर्वद्भ्यः संस्कृतस्य उत्कृष्टाचार्येभ्यः संचालकेभ्यः गुरुविरजानंद-आचार्यसम्मानं, विद्यामार्तण्डः ,सीतारामशास्त्रिसम्मानं, युधिष्ठिरमिमांसक-आचार्यसम्मानं, स्वामिधर्मदेवसंस्कृतसमाराध कसम्मानं च प्रारब्धानि। एतावता एकोनत्रिंशत् आचार्याः गुरुकुलसंचालकाः सम्मानिताः। वर्षे 2017 2018 निमित्तं पुरस्काराणां घोषणा अकादमीद्वारा कृता । शीघ्रं सर्वे विद्वांसः अपि सम्मानयिष्यन्ते।

## जामियाविश्वविद्यालयद्वारा आरब्धं निःशुल्कं संस्कृतसम्भाषणपाठ्यक्रमः

नवदिल्ली। दिल्ल्याः जामियाविश्वविद्यालयद्वारा निःशुल्कं संस्कृतसम्भाषणपाठ्यक्रमः आरब्धः तत्र अद्यारभ्य 5 वादनतः 7 वादनपर्यन्तं संस्कृतविभागपक्षतः संस्कृतं वक्तुं आगामिनवदिनेषु होराद्वयात्मिका गूगलमीटद्वारा कक्षा संचाल्यते । संस्कृतमध्येतुम् इच्छुकच्छात्राः प्रवेष्टुं आधिकारिक वेबसाइट गत्वा आवेदनं कर्तुं शक्यम्।

# उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ केवलं विंशतिघण्टात्मके काले अन्तर्जालमाध्यमेन सरलसंस्कृतसम्भाषणं प्रशिक्षयति-डॉ० वाचस्पतिः मिश्रः

उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ इत्यनेन अद्य देववाणीसंस्कृतं व्यवहारिकं स्वरूपं प्रदातुं अन्तर्जालीयमाध्यमेन विंशतिदिवसात्मिकानां प्रतिभागिभिः परस्परं संस्कृतेन परिचयः,विविधवस्तूनां नामानि,क्रियापदानां विभक्तीनां ज्ञानं सम्प्राप्य संस्कृतसम्भाषणाभ्यासः




संस्कृतसम्भाषणकक्ष्याणां सामूहिकरूपेण समुद्घाटनं विहितम्। तत्र मुख्यातिथिरूपेण संस्थानाध्यक्षेण डा० वाचस्पतिमिश्रेण सर्वेभ्य शुभाशंसनानि प्रयच्छन् प्रोक्तं यत् साम्प्रतं वयम् ऑनलाईनमाध्यमेन स्वल्पे समये संस्कृतं वक्तुं शक्नुमः,एतदर्थं विविधावसराः सहजरूपेण अस्माभिः लब्धाः सन्ति येषां लाभं स्वीकृत्य अस्माभिः समाजः सुसंस्कारितः कर्तुं शक्यते। तत्रैव प्रशिक्षणप्रमुखेण श्रीमता सुधिष्ठकुमारमिश्रेण संस्कृतसम्भाषणस्य महत्त्वं प्रतिपादयन् सर्वेऽपि प्रतिभागिनः प्रेरिताः। अवसरेऽस्मिन् सुशीलकुमारेण, डा० रत्नेश्वरमणित्रिपाठिना,प्रशिक्षणसमन्वयकेन धीरजमैठाणिना स्वीयाः विचाराः प्रस्तुतीकृताः। संस्थानद्वारा उत्तरप्रदेशसहितं देशस्य नैकानां राज्यानां दससहस्रं प्रतिभागिनां मिसकालमाध्यमेन पञ्जीकरणं विध ाय तेभ्यः गूगलमीटमाध्यमेन सम्भाषणकक्षाः सञ्चाल्यन्ते। प्रारम्भे कृतः। अवसरेऽस्मिन् संस्थानाधिकारिणः श्रीदिनेशमिश्रः,डा० चन्द्रकला शाख्या इत्यादयः उपस्थिताः आसन्। तत्रैव प्रथमदिवसे संस्कृतप्रशिक्षकेषु आचार्यः विशालप्रसादभट्टः, राधा शर्मा,योगेश अवस्थी, सवितामौर्या,मीनाधुरिया,दीनदयाल अवस्थी इत्यादिभिः अन्तर्जालमाध्यमेन प्रातः सायं सत्रद्वये संस्कृतसम्भाषणकक्षा सञ्चालिता। उभयोरपि कक्ष्ययोः भारतस्य विविधेभ्यः प्रदेशेभ्यः नैकैः प्रतिभागिभिः समुपस्थाय महता उत्साहेन संस्कृतसम्भाषणस्य प्रशिक्षणं प्राप्तम्। संस्थानस्य अस्यामभिनवयोजनायां त्रयस्त्रिंशदधिकपञ्चशतोत्तरोष्टसहस्रं शिक्षार्थिभिः पञ्जीकरणं कारितम्। अद्य जुलैमासस्य विंशतिदिनाङ्के मङ्गलवासरे सप्तचत्वारिंशत् समूहेषु सप्तविंशतिप्रशिक्षुभिः पञ्जीकृतेभ्यः प्रशिक्षणार्थिभ्यः प्रशिक्षणप्रदानं समारब्धम्।

# उत्तरप्रदेशे वर्धिता संस्कृतम् अधिगन्तुं रुचिः, अष्टसहस्राधिकजनाः कुर्वन्ति ऑनलाइनकक्षाम्

लखनऊ- उत्तरप्रदेशसंस्कृतसंस्थानेन आरब्धं कारितम्। अस्मिन् जुलाईमासे 8533सङ्ख्यकैः छात्रैः संस्कृतम् अधिगन्तुम्




प्रथमस्तरीयसंस्कृतभाषाशिक्षणम् मिसकॉलमाध्यमेन कर्तुं शक्यते कक्षायां सम्मिलितुं पञ्जीकरणम् प्रतिदिनम् एकहोरात्मिका आभाषिकक्षा प्रवर्तते।तत्र सामाजिकवृत्तिवर्गजनाः अपि संस्कृतम् अधिगन्तुम् उत्साहिनः।

उत्तरप्रदेशे संस्कृतभाषाम् उन्नेतुं प्रदेशसर्वकारस्य अभियानम् उन्नतिम् आनयति । विशेषतया युवसु संस्कृतभाषाम् अधिगन्तुं उत्साहः वर्धितः वर्तते । उत्तरप्रदेशसंस्कृतसंस्थानेन आरब्धसंस्कृतभाषाशिक्षणेन संस्कृतं पाठयितुम् अभियानं बहु प्रभावोत्पादकं सिद्धः भवति । केवलं एकस्मिन् मासे अष्टसहस्राधिकजनैः संस्कृतस्य आभासिकक्षासु स्वकीयं पञ्जीकरणं कारितम्। संस्थानपक्षतः प्रतिदिनम् एकहोरात्मिका संस्कृतकक्षा सञ्चाल्यते।उत्तरप्रदेशसंस्कृतसंस्थानपक्षतः संस्कृतं वक्तुं, पठितुम्, अधिगन्तुं च इच्छुकेभ्यः जनेभ्यः संस्कृतभाषाशिक्षणस्य सुविधा आरब्धा । सर्वतोविशिष्टा वार्ता एषा अस्ति यत् संस्कृतम् अधिगन्तुम् इच्छुकाः दूरवाणीसङ्ख्यां प्रति 9522340003 मिसकॉलएलर्टमाध्यमेन आभासिकक्षायां स्वकीयं पञ्जीकरणं कारयितुं शक्नुवन्ति । अनया सुविधया संस्थानाय अधिकः लाभः अपि प्राप्तः । वृहद्सङ्ख्यासु युवभिः छात्रैः मिसकॉलमाध्यमेन स्वकीयं पञ्जीकरणं आभासिकक्षाभ्यः इच्छुकैः जनैश्च स्वकीयं पञ्जीकरणं कारितम् अपि च ते नियततया कक्षां कुर्वन्ति ।

संस्थानानुसारम् आभासिमाध्यमेन संस्कृतम् अधिगन्तुम् इच्छुकेभ्यः जनेभ्यः सप्तचत्वारिंशत्कक्षाणां सञ्चालनं क्रियते। एतेषु शिक्षकैः ऑनलाइनसंस्कृतस्य पाठशाला स्थाप्यते । संस्थानानुसारं संस्कृतम् अधिगन्तुषु युवावर्गस्य सङ्ख्या अधिका अस्ति । शिक्षकाः प्रतिदिनं एकहोरात्मकाम् आभासिकक्षां पाठयन्ति, याः पूर्णरूपेण निःशुल्कं सन्ति।उत्तरप्रदेशसर्वकारः निरन्तरं देवभाषां संस्कृतं प्रति रुचिम् आनेतुं संस्कृतम् अधिगन्तुं च इच्छुकेभ्यः जनेभ्यः अवसरं प्रदातुं संलग्नः अस्ति । अस्मिन् उत्तरप्रदेशसंस्कृतसंस्थानेन वृहतीं भूमिकां निर्वहति । संस्थानस्य अध्यक्षेण डॉ. वाचस्पति मिश्रेण उक्तं यत् बहवः जनाः संस्कृतम् अधिगन्तुम् इच्छन्ति । विशेषतया वृत्तिवर्गाणां, चिकित्सकानाम्, अभियन्तॄणां, व्यापारिणां च समयाल्पताम् उद्दिश्य एषः प्रकल्पः चिन्तितः । तन्निमित्तम् एतत् सेवायाः वरदानभूतम् । अनेन संयुज्य तत्रैव संस्कृतभाषाशिक्षणस्य पठनस्य च निःशुल्कं प्रशिक्षणं प्राप्तुं शक्यते। क्रियान्वयनगते तत्र प्रशिक्षणप्रमुखः सुधीष्ठकुमार मिश्रः, सहायकप्रशिक्षणप्रमुखः सुशीलकुमारः, प्रशिक्षणसमन्वयकः धीरज मैठाणी, कार्यालयसमन्वयकः रत्नेश्वरमणि त्रिपाठी च वर्तन्ते। तत्र तेनोक्तं यत् पञ्जीकरणाय अभ्यर्थिभिः केवलम् एकं गूगल-आवेदनं पूरिष्यते । आवेदने तेभ्यः स्वकीयव्यवसायस्य, वृत्तेः पठनस्य च सूचना प्रदास्यते । अस्यानन्तरं व्यवसायानुरूपं समूहमाध्यमेन अस्मिन् संस्कृतस्य पाठनं कारयिष्यते । तेनोक्तं यत् संस्कृतपठितुम् इच्छुकच्छात्रेभ्यः संस्कृतज्ञानेन च सहैव नैतिकसंस्काराणां विषये सूचना प्रदास्यते । हिन्द्या, आङ्ग्लेन च सह छात्रेभ्यः संस्कृते वक्तुम् अपि शिक्षयिष्यते ।

## त्रिषु मासेषु प्रत्येकं ग्रामपञ्चायतस्य भविष्यति स्वकीयः सचिवालयः



लखनऊ। प्रप्रथमम् उत्तरप्रदेशे ग्रामपञ्चायतानां स्वकीयः ग्रामसचिवालयः पञ्चायतभवनं च भविष्यति । एतयोः ग्रामस्य जनेभ्यः सरलतया सर्वकारस्य कल्याणकारीयोजनानां लाभः तु प्राप्स्यते एव साकमेव वित्तकोषस्य सुविधा अपि उपलप्स्यते। सर्वे नवीनैः अत्याधुनिकैः उपकरणैः युक्तं ग्रामसचिवालयस्य भवनं दर्शनेन एव भविष्यति । एतयोः जनसुविधाकेन्द्रम् अपि भविष्यति वित्तकोषस्य सेवां प्रदातुं बीसीसखी अपि उपवेक्ष्यति ।

ग्रामपञ्चायतानां कार्यप्रणाल्याः कृते व्यवस्थितं स्वरूपं प्रदातुं प्रदेशसर्वकारेण बहुतीव्रतया कार्यं क्रियते । सर्वकारेण एतन्निमित्तम् अग्रे त्रिषु मासेषु सर्वेषु ग्रामपञ्चायतेषु ग्रामसचिवालयभवनानि ग्रामपञ्चायतभवनानि च स्थापयितुं निर्देशः दत्तः। सर्वकारस्य अनेन प्रक्रमेण ग्रामस्य जनेभ्यः वृहद् सुविधा प्राप्स्यते। विकासकार्याणां गतौ प्राप्तौ सत्यां ग्रामवासिनां समस्या पूर्वापेक्षया न्यूनसमये निस्तारिता भवितुं शक्ष्यति।

ग्रामे-ग्रामे विकासाय गतिं प्रदातुं पञ्चायतीराजव्यवस्थां दृढीकर्तुं च संलग्नेन राज्यसर्वकारेण सर्वेषु ग्रामपञ्चायतेषु ग्रामपञ्चायतकार्यालय भवनस्य सुदृढीकरणस्य, विस्तारस्य नवखनिर्माणस्य च कार्यं तीव्रतया कृतम्। ग्रामसचिवालयानां स्थापना अपि सर्वकारस्य अभिनवप्रयोगः अस्ति येन आगामिष्यमाणे समये ग्रामीणजनेभ्यः वृहद् लाभः प्राप्स्यते। अवधातव्यं यत् प्रदेशे सर्वकारस्य अधिकारप्राप्तेः अनन्तरम् एव योगिना आदित्यनाथेन ग्रामस्य प्रत्येकं व्यक्तिपर्यन्तं सर्वकारस्य कल्याणकारिणीयोजनानां लाभप्राप्तेः प्रयासः कृतः । ग्रामेखग्रामे स्वच्छतां प्रति बलं प्रदातुं विशेषस्वच्छताभियानानि सञ्चालितानि । ग्रामस्य महिलाः सशक्तकर्तुं प्रयासाः कृताः । एतावत् एव न अपितु कोरोणाकाले ग्रामेखग्रामं प्रति चिकित्सासुविधा उपलब्धकरणेन सह जीवनं जीविकां च रक्षणस्य वृहत् कार्यं कृतम् ।

# पद्यरचना-कार्यशालाम् अभिलक्ष्य मदीयोऽनुभवः

डॉ. जितेन्द्रकुमार, सह-आचार्य
राजकीय स्नातकोत्तर महाविद्यालयः, पंचकूला
(हरियाणा)
9416783680dr
jitenderarya@gmail-com

सर्वेभ्यो नमो नमः।

जितेन्द्रो नामधेयोऽहं पंचकूलास्थे (हरियाणा) राजकीय स्नातकोत्तरे महाविद्यालये सेवारतोऽस्मि। मूलतः व्याकरणस्य छात्रोऽहम्, किन्तु साहित्ये रुचिमान् गतिमान् च बुभूषुः। गद्यमाध्यमेन साहित्यसर्जने यथामति प्रयासमपि करोमि। किन्तु इतः पूर्वं पद्यानां विरचने महान् क्लेशोऽनुभवामि स्म समुचितस्य शिक्षणस्य अभावात्।

जुलाईमासस्य प्रथमसप्ताहे संस्कृतभारत्याः ह्वाट्सऐप-समूहमाध्यमेन ज्ञातं मया यद् रामटेकस्थेन कविकुलगुरु-कालिदास- संस्कृतविश्वविद्यालयेन वेदवेदान्ताध्ययनशोध संस्थया च सम्मील्य एका दशदिवसात्मिका पद्यरचना-कार्यशाला आयोज्यते। तदन्तरं सन्धिसमासात्मिकां विशिष्टां प्रवेशपरीक्षाम् उत्तीर्य अहमपि निःशुल्क-पद्यरचना-कार्यशालायाः अंगीभूतोऽभूवम्।

सौभाग्याद् उद्घाटनसत्रे एव पूज्यपादः श्रीविश्वप्रसन्नतीर्थः, अभिराजराजेन्द्रमिश्रवर्यः, डॉ. आर गणेशवर्यः सदृशानां दिव्यविभूतीनाम् अन्तर्जालमाध्यमेन साक्षात्कारः कृतः आशीषश्च गृहीतः। तद्दिने एव संयोजकः डॉ. धनंजयरावः कार्यशालायाः सकलां रूपरेखां व्यावृणोत्। एवं पद्यरचनायाः विशिष्टां रीतिं नीतिं च विज्ञाय अहम् अमन्दम् आनन्दम् अनुभूतवान्।

कालिदासगणीयाः वयं द्वादशजनाः डॉ शशिकिरणवर्यं शिक्षकरूपेण लब्धवन्तः। शिक्षणस्य प्रथमदिने एव डॉ. शशिकिरणमहोदयः आचार्यक्षेमेन्द्र-विरचितान् पद्यरचना- विषयकान् बिन्दून् विशदीकृतवान्। छन्दसः लक्षणं नकारविधिना कथं सुगमः बुद्धिस्थश्च भवति इत्यपि ज्ञापितवान् महोदयः।

प्रयोगपुरस्सरमेव आसीद् इह अखिलं शिक्षणम्। द्विहोरात्मकः कालोऽपि पर्याप्त आसीत् प्रतिदिनम्। आचार्यवर्यः पदे पदे प्रेरितवान् अस्मान् पद्यरचना-अभ्यासाय। प्रतिभासम्पन्नैः मम मित्रैः विरचितानि पद्यानि अन्येद्युः परिशील्य सर्वेषां पुरतः निर्दुष्टत्वपि साधितवान् आचार्यः।

पद्यरचना- शिक्षणविषये महत्कौशलम् अनुभवश्च आसीद् आचार्यवर्यस्य। वयसा अवृद्धोऽपि ज्ञानवृद्धः, उपनेत्रधार्यपि सूक्ष्मनिरीक्षकः, शतावधानिनः शिष्योऽपि काव्ये दत्तचित्तो ऽस्ति आचार्यशशिकिरणः। मधुरवाग्धरः व्यवहारकुशलः, विनयसम्पन्नः, अगाधज्ञानयुतश्चास्ति आचार्यः। अतः सर्वैः अतिशयेन अभिनन्दितः भूयसा पूजितश्च कविवरः शशिकिरणवर्यः।

अहं कालिदास- संस्कृतविश्वविद्यालयस्य माननीयं कुलपतिं प्रो. श्रीनिवास- वरखेडीवर्यं, भाषासाहित्य- विभागस्य अध्यक्षां प्रो. कविताहोले महोदयां प्रत्यपि स्वपक्षतः स्वगणपक्षतश्च कार्तज्ञ्यं समर्पयामि, यैः अस्मादृशाम् अपरिचितानां दूरदेशीयानां प्रशिक्षुकाणां कृते निःशुल्कं शिक्षणव्यवस्था कृता। कार्यशालायाः संयोजकभूतः डॉ. धनंजयरावः, (निदेशकः वेदवेदान्ताध्ययन- शोधसंस्था दिल्ली) अन्ये च अन्तर्जालशिक्षण-व्यस्था- सहयोगिनश्च सर्वेऽपि धन्यवादार्हाः।

अन्ते भवन्तं सप्रश्रयं प्रार्थयामि यद्येऽपि कविकर्म- प्रवृत्तानाम् अस्मादृशानां कविकुलगुरोः अनुचरान् एतादृशं स्ववसरं प्रदास्यन्तीति।

# अनुभवकथनं कार्तज्ञञ्च

धन्यास्ति संस्था कविवर्यधन्या धन्या वयं ये कविवर्ययुक्ताः।
धन्यास्ति वेला समुपस्थिता या धन्यो विधाता च कृपास्य लब्धा।।

महदिदं सौभाग्यं मे यत् 'कविकुलगुरुकालिदास-संस्कृत-विश्वविद्यालयः, रामटेकम्' तथा वेदवेदान्ताध्ययनशोधसंस्था, नवदेहली इत्यनयोः संयुक्तत्वावधान समायोजितायाः दशदिनात्मिकायाः संस्कृपद्यरचनाकार्यशालायामध्येतुमवसरः प्राप्तः। कार्यशालायाः सुबन्धुसमूहे द्वादशकाव्यपिपासवो वयं सौम्यस्वभावशीलमृदुभाषिच्छात्रवत्सल-पितृकल्प-सुकविपुङ्गवानां डॉ. अरविन्दतिवारीमहाभागानां सानिध्ये २१ छन्दसां प्रशिक्षणं प्राप्तवन्तः। कार्यशालायां प्रतिदिनं छन्दसां पाठानात्परं तेषामभ्यासोऽपि कार्यते स्म। अस्मिन् समये मयाऽपि पद्यरचनाप्रयासो विहितः। तेषु इन्द्रवज्राच्छन्दसि वर्षर्तुविषयमधिकृत्य यथा-

सौन्दर्ययुक्ता नयनाभिरामा वर्षर्तुकाले सकला हि सृष्टिः।
संजायते सस्यसमन्विता क्ष्मा केषां न चित्तं रमतेऽधुना भोः।।

तोटकछन्दसिजनकविषयमधिकृत्य जनकपञ्चकं विरचितम्। ततः पद्यमेकम्-जनकोऽस्ति सखा प्रियधाम स मे जनकात्तु परं मम नो शरणम्।

भगवन्! विलसेन्मयि तातदया मनसा वचसा प्रणमामि सदा।।

स्रग्विणीछन्दः-

जातमस्त्यद्यलोके न जानेऽत्र किं स्वार्थपूर्तौ रतास्सर्वतो मानवाः।
क्षीयते साम्प्रतं बन्धुभावो भृशमेकता नास्ति वृन्दे कथं बन्धवः।।

अस्माकं गुरवः कार्यशालायां पादपूर्त्येऽपि प्रेरयन्ति स्म। यत्र काव्यदृष्ट्या दोषा आसन्तत्र तस्मिन्नेव काले महोदयैः संशोधनं कृतमित्यपि महल्लाभाय। अन्येष्वपि छन्दस्सु पद्यरचनाप्रयासः कृतःकार्यशालेयं मदर्थं महदुपकारिणी सञ्जाता। अग्रेऽपि एतादृश्यः कार्यशाला निश्चयेन योजनीयाः, यतः सर्वेकाव्यरसिकाः लाभान्विता भूत्वा सुरभारत्याः जगति सेवासमर्था भवेयुः।

अन्ते पुनरेकवारं पद्यरचनाकार्यशालायाः सुसम्पन्नतायै विश्वविद्यालयस्य सकलायोजकमण्डलस्य समेषां विदुषाम् अस्माकं गुरूणां डॉ. अरविन्दतिवारीमहाभागानाञ्च भूयो भूयो धन्यवादं विनिवेदयामि।

सादरं नमांसि! भवदीयः

धन्यवादः

-कुमारमनोजः
9816703727
sktkumarmanoj@gmail.com

# 'श्रीमद्भागवतदशमस्कन्धः एक अनुशीलन' इत्यस्य पुस्तकस्य हिमाचलप्रदेशस्य शिक्षा एवं भाषा-संस्कृति-मन्त्रिणा विमोचनम् कृतम्

(संस्कृत-संवादः)

हिमाचलप्रदेशस्य शिक्षा एवं भाषा-संस्कृति मन्त्रिणा श्रीगोविन्दठाकुरेन व्यासपूर्णिमायाः एवं गुरुपूर्णिमायाः अवसरे मण्ड्यां आयोजितस्य महोत्सवस्य अवसरे डॉ मनोजशैल द्वारा लिखितस्य 'श्रीमद्भागवतदशमस्कन्धः एक अनुशीलन' इत्यस्य



पुस्तकस्य विमोचनम् कृतम्। अस्य पुस्तकस्य प्रकाशनम् परिमलप्रकाशन देहली द्वारा कृतमस्ति।'

'पुस्तकस्य लेखकेन डॉ मनोज शैलेन उक्तं यत् अस्मिन् पुस्तकें षडाध्यायाः सन्ति । ष्पुराणपरिचय' नामके प्रथमेऽध्याये पुराणपरिचयः तथा भागवतपुराणस्य कर्तृत्वं एवं प्रतिपाद्यम् इत्यस्य विवेचनम्, 'श्रीकृष्णजन्मोत्सवः एवं संस्कारः' नामक-द्वितीये-अध्याये भगवतः श्रीकृष्णस्य जन्मनः रहस्यं एवं संस्कारानां वर्णनम्, भगवतः श्रीकृष्णस्य त्रिविध-लीलानां बाल-प्रेमपरक-वीरतापरक-लीलानां विवेचनं 'श्रीमद्भागवतस्य लीलात्मकं स्वरूपं' नाम्नि तृतीये अध्याये, 'श्रीमद्भागवतस्य गीतात्मकस्वरूपं' नामक-चतुर्थे अध्याये श्रीमद्भागवतपुराणस्य दशमस्कन्धस्य गीतानां स्वरूपम्, भागवतानुसारं धर्मस्य स्वरूपं एवं दार्शनिक विषयानां विवेचनं 'धर्म एवं दर्शन विषयक वर्णन' नामके पञ्चमेऽध्याये तथा च दशमस्कन्धस्य अवशिष्ट विषयानां अनुशीलनं 'विविधविषयकवर्णनष्नामके षष्ठेऽध्याये कृतम् अस्ति।' 'डॉ मनोज शैलेन उक्तं यत् पुस्तकस्य प्रकाशनं शोधदृष्ट्या जातम् अस्ति अपि च हिमाचलप्रदेशविश्वविद्यालयस्य सेवानिवृत्तानां पूर्वविभागाध्यक्षाणां अधिष्ठाताभाषासंकायानां आचार्यवीरेन्द्रकुमारमिश्रवर्याणां निर्देशने शोधकार्यम् पूर्णं जातम् अस्ति।'

प्रथमपुटस्य शेषभागः

## भारतं करिष्यति समग्रजगतः...

प्रमाण-पत्रं वितरितम् कार्यक्रमे विभिन्नसांस्कृतिककार्यक्रमेषु उपस्थितस्य जनसमूहस्य मनो मुग्धम्।

कार्यक्रमे प्रो. महावीरः, साध्वी देवप्रिया, स्वामी परमार्थ देवः, डॉ. एन.पी. सिंहः, श्री एन.सी. शर्मा, भगिनी ऋतंभरा, श्री ललित मोहन,ः भगिनी अंशुलः, पारुलः, डॉ. जयदीप आर्यः, भाई राकेशः, श्री एस.के. तिजारावाला, श्री एल.आर. सैनी, श्री तरुण राजपूतः, भाई विनोदः, स्वामी तीर्थदेवः,साधना सम्पूर्णदेशतः पतंजलि योगपीठस्य समस्तसंगठनेषु यथा-भारतस्वाभिमानं, पतंजलियोगसमितिः, महिलापतंजलियोगसमितिः, युवभारतः, पतंजलिकृषकसेवासमितिश्चेत्यादिभिः सोश्यल मीडियाराज्यप्रभारिभिश्चापि उपस्थाय गुरुसत्ताः आशीर्वादः प्राप्तः




# महिलाभ्यः पुत्रीभ्यः च विभागैः परस्परसमन्वयेन च प्राप्स्यते योजनानां लाभः

लखनऊ। महिलानां सुरक्षायै सशक्तिकरणाय सङ्कल्पितः राज्यसर्वकारेण जुलाईमास्य त्रिंशत् दिनाङ्कतः प्रदेशे 'मिशन-शक्तेः' तृतीयचरणस्य प्रक्षेपणं क्रियते। एतन्निमित्तं सिद्धता पूर्णा कृता। सर्वकारस्य अभिलाषा अस्ति यत् प्रदेशस्य महिलाः शिक्षिताः, सशक्ताः, स्वावलम्बिनः, आत्मनिर्भराः च भवेयुः । तेभ्यः सुरक्षाप्रदानं, तेषां स्वास्थ्यस्य संरक्षणेन सह शिक्षायाः क्षेत्रे अग्रे वर्धनीयम् अस्ति।

राज्यसर्वकारेण प्रदेशे मिशनशक्तिः सदृशवृहदभियानम् आरभ्य तेषां गतिं विकासस्य पथेन सह योक्तुं वृहद्कार्यं कृतम् । अस्य प्रक्रमस्य प्रथमद्वितीयचरणयोः सफलतायाः अनन्तरं प्रदेशे जुलाईमासस्य त्रिंशदिनाङ्कतः पुनः सर्वकारेण मिशनशक्तेः नूतनचरणं आरभ्यते । अवधातव्यम् अस्ति यत् 2020तमे वर्षे अक्तूबरमासस्य सप्तदशदिनाङ्के सर्वकारेण मिशनशक्तियोजना प्रदेशे आरब्धा । योजनायाः द्वितीयचरणं प्रचलति।



# सम्पादकीयम्

सम्मानीयाः अमरवाणीसमर्चकाः!

सादरं प्रणतयो विलसन्तु।

मान्याः! संस्कृतसंवादस्य नवांकमादाय समुपस्थिताहं भूयो भूयो विदुषो भवतो नमामि। तदनु वृष्टेस्स्वागताय मनोभावं प्रकटीकरोमि। महोदयाः! सर्वत्र वर्षति मेघे सस्यश्यामला धरा प्रसन्ना सती मोहयन्तीव विलोक्यते। दर्शनीयो हरीतिमा नन्दयति मानसं न केषामिति। सत्यमेवोक्तमस्ति यत् वर्षा एव ऋतुराज्ञी वर्तते। इयमेव प्रचण्डसूर्यनिदाघदग्धां वसुधां जलमाकण्ठं पाययित्वा मोदते। वृक्षा जीवाः लताः सरितः नद्यः सागराः सर्वे अपि वृष्ट्या एव सुखमनुभवन्ति। अस्तु स्वागतमस्या वृष्टेरिति सानन्दं वच्मि।

विद्वांसः! सद्य एवास्माभिः अस्माकं देशे आषाढशुक्लपूर्णिमावसरे व्यासपूर्णियामां गुरुपर्व सोल्लासमनुष्ठितम्। धन्या भारतीया परम्परा या सर्वदा ज्ञानविज्ञानदातारं गुरुं पूजयितुं प्रेरयति। उपनिषदि अपि प्रोक्तमस्ति यत्

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।

तेजस्विनाधीतमस्तु मा विद्विषावहै।।

अत्र आचार्यो भगवन्तं प्रार्थयते यत् हे प्रभो! आवयोः गुरुशिष्ययोः रक्षां पालनं कुरु। आवयोः शक्तिं धेहि। आवयोरधीता विद्या यशस्विनी भूयात्। नावयोः कदापि वैरभावो भवेदिति। हन्त! इयं या दिव्या भावना साम्प्रतं क्वचिदेव विलोक्यते। परन्तु गुरुमार्गगामिनो वटवः शिष्याः अधुनापि सन्ति ये गुरुवचनं सर्वथा पालयन्तः सुरभारतीं सेवमाना दृश्यन्ते। वस्तुतः गुरुपूर्णिया शिक्षयति यत् गुरोराज्ञां पालय, तदुक्तमवधारय। यः शिष्यः गुरुमपूज्यापि तन्मार्गमारूढो वर्तते तस्य कर्मपूजया गुरुर्भवत्येव प्रीत एवेति नास्ति संशयः। गुरवस्तु न भौतिकपदार्थलोलुपा अपितु ते तु संस्कृतसंस्कृतिसंरक्षणमेव शिष्यान् याचन्ते। अतः शिष्यैः स्वस्वशास्त्रपरम्परा संरक्षणीया इत्येवं शिक्षयति गुरुपूर्णिमा। अस्मिन् पर्वणि बहुभिः संस्थानैः गुरुमुद्दिश्य संगोष्ठ्यः कविसम्मेलनानि च आयोजितानि, तैः कार्यक्रमैः गुरोः महिमा कविभिः विद्वभिश्चागीयतेति ज्ञात्वा मोदमाना संस्कृतिर्भारतीया पुनरायाति निजवैभवम्।

सुमतयः! याति कोरोना देशत इति ज्ञात्वा सुखिनो मोदामहे। किन्तु असावधानता न करणीया। सर्वकारस्य प्रतिपलं निर्देशः पालनीयः। दो गज की दूरी मास्क है जरूरी। एवमुक्त्वा सर्वेषां मंगलं कामयमानाहं भगवन्तं वन्दमाना विरमामीति।

भवदीया

सम्पादिका

अमरवाणी विजयताम्।

## वेदामृतम्

**यत्र द्वाविव जघनाधिषवण्या कृता।**
**उलूखैलसुतानामवेद्विन्द्र जल्गुलः॥२॥**

अर्थ–इस मन्त्र में उपमालङ्कार है। मनुष्यों को योग्य है कि जैसे दोनों जाँघों के सहाय से मार्ग का चलना–चलाना सिद्ध होता है, वैसे ही एक तो पत्थर की शिला नीचे रक्खें और दूसरा ऊपर से पीसने के लिए बट्टा जिसको हाथ में लेकर पदार्थ पीसे जाएँ इनसे ओषधि आदि पदार्थों को पीसकर यथावत् भक्ष्य आदि पदार्थों को सिद्ध करके खावें वह भी दूसरा साधन उखली मूसल के समान बनाना चाहिए।।२।।

**अब अगले मन्त्र में यह विद्या कैसे ग्रहण करनी चाहिए, इस विषय का उपदेश किया है–**

**यत्र नार्यपच्यवमुपच्यवं च शिक्षते।**
**उलूखेलसुतानामवेद्विन्द्र जल्गुलः ॥३॥**

अर्थ–यह उलूखल विद्या जो भोजनादि के पदार्थ सिद्ध करनेवाली है गृह–सम्बन्धि कार्य करनेवाली होने से यह विद्या स्त्रियों को नित्य ग्रहण करनी और अन्य स्त्रियों को सिखानी भी चाहिए, जहाँ पाक सिद्ध किये जाते हों वहाँ यह सब उलूखल आदि साधन स्थापन करने चाहिएँ, क्योंकि इन के विना कटना, पीसना आदि क्रिया सिद्ध नहीं हो सकती ।।३।।

इसके सम्बन्धी और भी साधन का अगले मन्त्र में उपदेश है

**यत्र मन्थौ विबध्नते रश्मीन्यमितवाइव।**
**उलूखेलसुतानामवेद्विन्द्र जल्गुलः॥४॥**

अर्थ–इस मन्त्र में उपमालङ्कार है। ईश्वर उपदेश करता है कि हे विद्वानो! जैसे सूर्य अपनी किरणों के साथ भूमि को आकर्षण शक्ति से बाँधता और जैसे सारथि रश्मियों से घोड़ों को नियम में रखता है वैसे ही मथने, बाँधने और चलाने की विद्या से दूध आदि वा ओषधि आदि पदार्थों से मक्खन आदि पदार्थों को युक्ति के साथ सिद्ध करो ।।४।।

उक्त उलूखल से क्या करना चाहिए, इस विषय का उपदेश अगले मन्त्र में किया है–

विदविज्ञानम् ( नृत्नानुसन्धानम् )

# अस्माकं ब्रह्माण्डम्

**डॉ. रामदेवसाहूः**
प्रोफेसर एवं विभागाध्यक्ष
विश्वगुरुदीप आश्रम शोधसंस्थानम्
जयपुरम् (राजस्थानम्)

अस्माकं ब्रह्माण्डंयस्यानाहः परिणाहश्च षट् खर्व (६०००००००००००) कि.मी. वर्तते, तस्य केन्द्रसूर्योविद्यते । ब्रह्माण्डस्यपरिधेः समानान्तरमूर्ध्वखगोले वायव्यतः उत्तरपूर्वमतिक्रम्याग्नेयपर्यन्तंएककोटि–षट्चत्वारिंशिल्लक्षनवतिसहस्त्र–चतुश्शतं (१,४६,९०,४००) कि.मी. परिमाणकं स्थानं रिक्तमस्ति। अस्मिन् ग्रहनक्षत्रतारकापृथिव्यादीनां विद्यमानतानास्ति ।सूर्यात् वायव्ये पञ्चकोटि–त्रिचत्वारिंशल्लक्ष–षण्णवतिसहस्रं (५,४३,९६,०००) कि.मी. दूरंसुमेरुः विद्यते। अयमेवब्रह्माण्डस्योत्तरीयं ध्रूवमुच्यते। अस्मात् स्थानात् पृथिव्याःक्षेत्राम् आरभते । सूर्यादाग्नेयेऽप्येतत्परिमाणदूरमेव कुमेरुःविद्यते। अयं च ब्रह्माण्डस्यदक्षिणं ध्रुवमस्ति। अत्र पृथिव्याःक्षेत्रं समाप्यते ।

एवं चेद्दशकोटि – सप्ताशीतिलक्ष–द्वानवतिसहस्रं (१०,८७,९२,०००) कि.मी. परिमाणकानाहपरिणाहमयं स्थानं पृथिव्याःक्षेत्रं लक्ष्यते। अस्मिन् क्षेत्रेब्रह्माण्डस्यपरिधेःसमानान्तरंवायव्यतः आरभ्यअस्माकंपृथिवी–पर्यन्तिकेभागेतिस्रोऽन्याअपिपृथिव्यःआसन् । एवमेवास्माकंपृथिव्या– आरभ्याग्नेयपर्यन्तिकेभागेऽपितिस्रोऽन्याः पृथिव्यः आसन् ।एवंप्रारम्भेसप्तर थानेपृथिव्याअस्तित्वमासीत् ।तेनसप्तद्वीपावसुन्धरा अवर्तत। कालान्तरजम्बूद्वीपीयभूमेरतिरिक्तम्अष्टादशद्वीपानांस्थितिः संजाता ।एते अष्टादशद्वीपाःवर्तमानेविद्यन्ते।

अस्माकं दृश्यमानापृथिवीजम्बूद्वीपस्यावशिष्टभागोऽस्ति ।वर्तमानेइयंब्रह्माण्डस्यनैऋत्येविद्यते ।इयंसूर्यात्द्वादशकोटि (१२००००००) कि.मी. दूरमधःसंस्थिताऽस्ति। अस्माकं पृथिव्या ऊर्ध्वनक्षत्रमण्डलं संस्थितं वर्तते। इदं नक्षत्रमण्डलं बुधशुक्रयोः मध्यवर्त्तिनिस्थाने उत्तरपश्चिमस्यां त्रयोदशलक्षपञ्चचत्वारिंशच्छहस्र–शतद्वयं (१३,४५,२००) कि. मी. परिमाणेविस्तृतमस्ति । नक्षत्रमण्डलादूर्ध्वपरमेष्ठिमण्डलमस्ति। इदं परमेष्ठिमण्डलमपिसूर्यादुत्तरपश्चिमस्यां तावत्येवपरिमाणेविस्तृतमस्ति । परमेष्ठिमण्डलस्य पूर्वतः पश्चिमस्यामानाहःद्वादशलक्ष–चतुरशीतिसहस्र–चतुश्शतं (१२,८४,४००) कि.मी. परिमाणेऽस्ति, किन्तु उत्तरतोदक्षिणस्यामस्यपरिणाहःद्वादशलक्ष–द्वासप्ततिसहस्रं (१२,७२,०००) कि.मी. परिमाण एवास्ति। अस्य परमेष्ठिमण्डलस्योत्तरस्यां दक्षिणस्यां च चतुर्दशसहस्रचतुश्शतं (१४,४००) कि.मी. क्षेत्रेप्रवहवायुर्विद्यते। अयमेववायुः ग्रहनक्षत्रतारकादीन् गतिशीलान् विदधाति।

ग्रहमण्डलस्य स्थितिःनक्षत्रमण्डलात् परमेष्ठिमण्डलात च पूर्वस्यां वर्त्तते, किन्तु अस्माकं पृथिव्याःदक्षिणपूर्वस्यां प्रतीयमानाभवति। अस्माकं दृश्यमानपृथिव्या आनाहः परिणाहश्च द्वादशलक्ष–चतुष्पष्टिसहस्र–अष्टशतं (१२,६४,८००) कि.मी. परिमाणकोऽस्ति। अस्याःदक्षिणभागे अष्टलक्षचत्वारिंशच्छहस्रं (८,४०,०००) कि.मी. क्षेत्रेसूर्यस्यप्रकाशोनैवनिपतति। केवलं दृश्यमानपृथिव्याः चतुर्लक्ष–चतुर्विंशतिसहस्त्र–अष्टशतं (४,२४,८००) कि.मी. परिमाणके क्षेत्रे एव सूर्यस्यप्रकाशोनिपतति। अतएव एतावानेवभूभागःप्रकाशते। अवशिष्टन्त्वन्धकार एवास्ति।

सूर्यस्यबिम्ब ९४४.२५ कि.मी. दूरपर्यन्तमेवप्रभाविभवति ।सूर्योदयकालेयदासूर्यः पृथिव्याः पार्श्वेतिष्ठतितदापि इदं बिम्बंउक्तदूरपर्यन्तंप्रभावनिपातयति ।तदानींचन्द्ररश्मयः पृथिव्याउपरिभागेविद्यमानाभवन्ति ।तासुरश्मिषुजलीयकणा–नामाधिक्यात्सूर्यबिम्बं– चन्द्ररश्मिषुप्रतिबिम्बितंभवति।तदावयंसूर्योदयः– सञ्जातइतिनिश्चिनुमः किन्तुयाथार्थे–नतुतदासूर्योदयो न भवति, अपितुप्रतिबिम्बितं–सूर्यमेवदृश्यमानभवति। याथार्येतसूर्यः षट्पंचाशत् (५६) मिनटान्तर– ालेक्षितिजंप्रयाति । एवंचास्माकंप्रतीयमानसूर्योदय –वास्तविकसूर्योदय– योर्मध्येषट्पंचाशत् (५६) मिनटपरिमाणावधिकमन्तरं भवति। सायंकालेसूर्यरश्मिषुविद्यामानानाम् आग्नेयकणानां अधिक्यात् चन्द्रबिम्बसूर्यकिरणेषु प्रतिबिम्बितंनभवति, अतएवचन्द्रोदयस्तुसर्वदावास्तविकसमयेएवभवति।

सूर्यः परमेष्ठिमण्डलं परिक्रामति। अनेनैवतदधोविद्यमानस्यनक्षत्रमण्डलस्य तातेऽप्यधोविद्यमानायाः पृथिव्याश्च परिक्रमणं सम्भवति। एवमेव चन्द्रःनक्षत्रमण्डलं परिक्रामति । तेनापिपृथिव्याः परिक्रमणं सम्भवति। एवंपृथिवीन–परिभ्रमति, केवलंसूर्यचन्द्रावेवगतिकुरुतः। पृथिवीतुअचलावर्तते। चन्द्रः अस्माकंदृश्यमानपृथिव्याः दशलक्षषट्पञ्चाशत्सहस्रं (१०,५६,०००) कि.मी. दूरमस्ति, सूर्यश्चद्वादशकोटि (१२००००००) कि.मी. दूरमस्ति। अतः चन्द्रेणपृथिव्यावा–सूर्यस्यपरिक्रमणं कदापिसम्भाव्यते ।नचसूर्यःचन्द्रोवापृथि–वींपरिक्रामति । पृथिव्याः स्थिरतायाः स्पष्टं प्रमाणमपिध्रुवमेवास्ति। ध्रूवपृथिव्याउत्तरस्यांतारकारूपेण–सुनिश्चितेएकस्मिन्नोवउदयबिन्दौदृश्यते । दिपृथिवीसूर्यपर्यक्रामिष्यत् तदाधुवः कथं सर्वदोत्तरस्यामलक्ष्यत ।यतोहि, कस्मादपिस्थिरवस्तुनः अन्यत् स्थिरवस्तु एव सर्वदा एकस्यां दिशि अवस्थितं भवितुं शक्नोति। कस्माच्चिदपि गतिशीलवस्तुनः अन्यत् स्थिरवस्तुसर्वदा एकस्यां दिशिनैवस्थाशक्नोति, यतोहियथायथा गतिशीलवस्तुनोदिक्परिवर्तनं भवति, तथातथात– त्रत्यदर्शकदृष्टेस्थिरवस्तुन्यपिदिक्परिवर्तनं प्रतीतं भविता।

इदमपिविचारणीयं वर्तते यत् पृथिवीयदिसूर्यपर्यक्रामिष्यत् तदापृथिव्याःप्रतिबिम्बंचन्द्रकक्षातःलक्ष्यमाणेषुद्वादशराशिष्वेवनिपतितस्यात्, न तु केवलं षट्स्वेवराशिषु ।यतोहिसूर्योभवता केन्द्रसुस्थिरोऽभिमतः। अस्यां स्थितौप्रत्येकं राशिः सूर्यमभितोविद्यमानायाः पृथिव्याविपरीतायां दिशि अभविष्यत् ।सर्वेषु च राशिषपृथिव्याः प्रतिबिम्बसमानरूपेणचन्द्रकक्षातोऽपिअद्रक्ष्यत।किन्तुनैवंभवति ।

चन्द्रकक्षायां स्थितेषुषट्स्वेवराशिषुपृथिव्याः प्रतिबिम्बंनिपतति। अतए वयाथार्थ्यकिमितिविचार्यते।

सूर्यचन्द्रयोरुभयोः परिक्रमणवृत्तं त्रयोदशलक्ष–पञ्चचत्वारिंशत्सहस्र–शतद्वयं (१३,४५,२००) कि.मी. परिमाणकत्रिज्यायुतमस्ति। चन्द्रोयदानक्षत्रमण्डलं परिक्रामतितदातत्परिक्रमणेनैवपृथिव्याद्वादशलक्ष–चतुष्पष्टिसहस्र–अष्टशतं (१२,६४,८००) कि.मी. परिमाणकानाहपरिणाहयुतस्य समग्रभागस्यसपरिधेरतिक्रमणं सम्भवति । चन्द्रस्यपृथिव्याः पूर्वस्यांसूर्यस्यचोत्तर–स्यांसंस्थितेरिदमतिक्रमणंपृथिव्याः दक्षिणभागेएवसम्भवति, यतोहिचन्द्रात् पूर्वस्यां सूर्यादुत्तरपूर्वस्यां चास्माकं पृथिव्याभागस्तदानीं नैवलक्ष्यमाणोभवति। इदमेव कारणमस्ति यत् चन्द्रकक्षातः येषट्राश्यः पृथिव्यादक्षिणवर्त्तिन्योभवन्ति, तेष्वेवपृथिव्याः प्रतिबिम्बंनिपतत्ति। तस्मादेवसूर्यचन्द्रयोर्ग्रहणस्यस्थितिर्भवति । यतोहियदिचन्द्रः स्वपरिक्रमणेपृथिव्याः कक्षा नातिक्रामिष्यत्, तर्हि कदापिसूर्यचन्द्रयोर्ग्रहणस्यस्थितिर पिनाभविष्यत्।

सूर्येणक्रियमाणस्यपरमेष्ठिमण्डलीयपरिक्रमणस्य चतुरशीत्युत्तरशतं (१८४) मार्गाःसन्ति। एते मार्गाःमिथः उपर्युपरि आनुक्रमिका भवन्ति । सूर्यः षण्मासावधौ एषु गतिं कुर्वन् पुनःविपरीतक्रमेणतैरव मार्गः ततः षण्मासानन्तरंस्वकीयं वास्तविकं स्थानमुपायाति। एवं परमेष्ठिमण्डलस्य परिक्रमणेसूर्यःद्वादशमासावधिं यावत् गतिं करोति। इदमेव गतिकर्म संवत्सरचक्रमप्युच्यते। एवमेव चन्द्रेणक्रियमाणस्य–नक्षत्रमण्डलीयपरिक्रमणस्यापि पञ्चदश (१५) मार्गाःसन्ति। चन्द्रःप्रतिदिनं मार्गपरिर्वनं कृत्वापरिक्रामति। एते चन्द्रमार्गा अपिसूर्यमार्गा इवमिथः उपर्युपरि आनुक्रमिका भवन्ति। चन्द्रः पञ्चदशसुदिवसेष्वेव पञ्चदशमार्गेषु गतिं कुर्वन् पुनःविपरीतक्रमेणतैरेव मार्गः पञ्चदशदिवसानन्तरंस्वकीयं वास्तविकं स्थानमुपायाति। एवं नक्षत्रमण्डलस्य परिक्रमणे चन्द्रः एकमासावधि (त्रिंशदिवसात्मकं) यावत् गतिं करोति ।

यदासूर्यः परमेष्ठिमण्डलस्य एकं परिक्रमणं समाप्नोतितदा चन्द्रःनक्षात्रमण्डलस्य द्वादशपरिक्रमणानिसमाप्नोति ।नक्षात्रमण्डलपरमेष्ठिमण्डलयोः परिक्रमणावध्योः पञ्चषादिवसात्मकमन्तरं सूर्यचन्द्रयोः गत्यन्तरादेवसम्भवति ।अतएवसौरचान्द्रवर्षमानभिन्नाताभवति ।

# रथसंक्षेपः



-नन्दप्रदीप्तकुमारः

श्रीक्षेत्रे रथयात्रा विश्वप्रसिद्धा । बहु पुरातनी रथसंस्कृतिः । अस्माकं भारतवर्षे वैदिककालादारभ्य रथनिर्माणस्य परंपरा वर्तते। पुर्यां त्रिषु रथेषु २१८८ काष्ठखण्डानि व्यवह्रियन्ते । तेषु फाशी- धउरा- असन- शाल्मली -देवदारु- पालधुआ- कअंस- महानिम्ब-वृक्षाणां प्रमुखभूमिका वर्तते । इमे वृक्षाः नयागड-दशपल्ला वनविभागेन प्रदीयन्ते । वैशाख-शुक्ल-तृतीया अथवा अक्षयतृतीया-दिवसात् प्रतिवर्षं नवीन-रथनिर्माणस्य शुभारम्भो जायते । शिल्पशास्त्र -मानसार -अपराजितपृच्छा -शुल्वसूत्र-मयमत-विशकर्मप्रकाश- शिल्पसारसंग्रहादिषु ग्रन्थेषु रथनिर्माणस्य वर्णनं लभ्यते। शिल्पशास्त्रानुसारं नन्दिघोषादिरथानां निर्माणं भवति । देवी चर्च्चिका रथनिर्माणस्य इष्टदेवी। श्रीनहर (राजगृहस्य) सम्मुखे इयं देवी विराजमाना । तत्र रथखलां (रथनिर्माणस्थानम्) निर्माय रथनिर्माणकार्यं जायते । रथनिर्माणे ये जनाः नियुक्ता भवन्ति तेषु विश्वकर्म(वर्धकी)- कर्मकार-रूपकार-चित्रकार-सूचीकार-भोइसेवकाः प्रमुखाः । ते निर्मातारः पारंपरिक-हस्त-अगुलि-मानेन रथनिर्माणं कुर्वन्ति ।

१-नन्दिघोषः-

नन्दिघोषः श्रीजगन्नाथस्य स्यन्दनम् । अस्य नन्दिघोषस्य गरुडध्वज-चक्रध्वज- कपिध्वजभेदेन नामानि प्रसिद्धानि। अयं रथः इन्द्रप्रदत्तः । रथरत्नं स्पटिकम् । विश्वकर्मा अस्य निर्माता। ३३ हस्त ५अंगुल =४४फुट ३ इञ्च उच्च-परिमिते अस्मिन् रथे ८३२ संख्यकानि काष्ठानि व्यवह्रियन्ते। अस्य षोडशसिद्धि-परिमितानि १६ चक्राणि,१६ अराश्च भवन्ति। प्रतिचक्रस्य व्यासः ७ फिट् । दैर्घ्य-प्रस्थौ ३५ फुट् । रथपीठस्य क्षेत्रफलः १२२५ फुट् । भूमेः दधिनउति-उच्चता २४ फुट् । पीतलोहितो रथावरणः । हिरण्यगर्भः दधिनउतिः । तत्र जीव-परमौ शुकपक्षियुगलौ । दारुकः रथ-सारथिः । चत्वारो घोटकाः शंख-श्वेत-बलाहक-हरिदश्वाः शुभ्राः । रथरज्जुः शंखचूडः। नभ-व्योम-आकाशानि त्रयः कलशाः । कलशोपरि शून्यचक्रस्य नाम सुदर्शनम् । पताका त्रैलोक्य मोहिनी । ध्वजचिह्नं हनुमान् । शंख-चक्रे रथायुधे । षोडशदलाकृतिः भद्रपीठः । चन्द्रातपनाम



कनकमुण्डी । सम्मुखद्वारस्य चित्रं कल्पवृक्षस्य द्वे पत्रे । उत्सवमूर्ती वासुदेव-मदनमोहनौ। जय-विजयौ द्वारपालौ । कुमुद-कुमुदाक्षौ प्रतिहारौ। रथरक्षकौ इन्द्र-गरुडौ। भैरव-नरसिंह-गरुड-वासुदेवाः रथपालाः। रथाधिपो वैनतेयः। रथदेवता नृसिंहः । शीर्षदेवता कल्याणसुन्दरः। चरदेवौ वराह-नृसिंहौ। सम्मुख पार्श्वदेवताः ब्रह्मेन्द्र-सप्तर्षयः। पृष्ठभागदेवताः नृसिंह-राम-नारायणाः । वामभागदेवताः त्रिविक्रम-हनुमत्-रुद्राः। दक्षिणे वराह-कृष्ण-गोपीनाथाः । रथदेवी योगमाया । रथभैरव एकपात्। रथशक्ती विमला-विरजे । रथयक्षः हर्याक्षः । रथगन्धर्वः वैधृतिः। रथ-सम्मुखे फुलमोची उर्वशी, पृष्ठे कनकमञ्जरी काममञ्जरी, वामे प्रेममञ्जरी चम्पकमञ्जरी, दक्षिणे अनंगमञ्जरी भ्रमरमञ्जरी चेमाः सर्वाः रथासीना अप्सरसस्तथा नारद-देवल-व्यास-शुक-पराशर-वशिष्ठ-विश्वामित्र-रुद्राः ऋषयश्च नन्दिघोषे विलसन्ति ।

२-तालध्वजः-तालध्वजरथस्य नायकः देवाधिदेवो बलदेवः। अस्य लांगलध्वज इति नामान्तरमस्ति। रथरत्नं मर्कतम् । मयदानवः अस्य निर्माता । ३२ हस्त १०अंगुल अथवा ३९ फुट् ४ इञ्च उच्चमान-विशिष्टेऽस्मिन् रथे ७६३ काष्ठखण्डानि व्यवह्रियन्ते। चतुर्दशभुवनसंज्ञकानि अस्य १४ चक्राणि,१४ अराश्च सन्ति। चक्रव्यासः ६ फुट्। रथपीठो मेरुकैलाश-संज्ञकः ३४ फुट् दैर्घ्य-प्रस्थविशिष्टः अष्टदलपद्माकारश्च। क्षेत्रफलः ११५६ फुट्। रथावरणः नीललोहितः। दधिनउतेर्नाम भुवनकोषः । अस्मिन् सुपर्ण-द्वासुपर्णौ शुकपक्षियुगलौ । चन्द्र-सूर्य-विद्युतः कलशत्रयः । कलशोपरि शून्यचक्रं कालसंहारः। पताका ऊन्मनी। ध्वजे तालचिह्नम्। रथरक्षकाः वासुदेव-भास्कर-रुद्राः। हल-मुसलौ रथायुधे। तीव्र-घोर-दीर्घश्रम-स्वर्णनाभाः चत्वारो घोटकाः कृष्णवर्णाः । रथरज्जुर्वासुकिः । ब्रह्म-शिवौ रथशक्ती । चन्द्रातपः कनकमेखलः। सम्मुखद्वारचित्रं पञ्चपत्रविशिष्टं तालपत्रम् । राम-कृष्ण-गोपालाः उत्सवमूर्तयः । सुशील-अतिशीलौ प्रतिहारौ। रथपालः आदिशेषः रथाधिपः बृहन्यासः । शीर्षदेवता अनन्तनागः। चरदेवौ ब्रह्म-शिवौ। गणेश-कार्त्तिकेय -मृत्युञ्जय -सर्वमंगला -प्रलम्बारि-हलायुध-नाटाम्बर- मुक्तेश्वर- शेषदेवाः नवपार्श्वदेवताः । रथदेवी केतुभद्रा । भैरवः क्षेत्रपालः । रथशक्ती जयदुर्गा शूलिनी दुर्गा च। रथयक्षः प्रचण्डः। जया-विजया-चण्डी-चण्डरूपा-नन्दा-आनन्दा-सनन्दा-तिलोत्तमाः अष्टौ अप्सरसः। अंगिरा-पुलह-पुलस्त-कृष्ण-मुद्गल-आत्रेय-काश्यप-आसष्टयः अष्टौ ऋषयः तालध्वजे निवसन्ति ।

३-देवदलनः- देवदलनस्य नायिका देवी सुभद्रा । अस्य रथस्य दर्पदलन इति नामान्तरमस्ति । रथरत्नं माणिक्यम् । कालनेमी अस्य निर्माता । ३१ हस्त वा३७ फुट् ६ इञ्च अस्य उच्चता । ५९३ काष्ठखण्डानि अस्मिन् रथे व्यवहतानि । अस्य राशिस्वरूपाणि १२ चक्राणि, १२ अराश्च सन्ति। चक्रव्यासः ५ फुट्। रथपीठः काम्पिल्यः ३३ फुट् दैर्घ्य-प्रस्थविशिष्टः सहस्रदलपद्माकारः । क्षेत्रफलः १०८९ फुट्। रथावरणः कृष्णलोहितः । हिरण्मयी दधि नउतिः । अत्र श्रुति-स्मृती शुकपक्षियुगलौ । परा-अपरा-वैखर्यः त्रयःकलशाः । दीप्तनामा शून्यचक्रम् । नादाम्बिका वैजयन्ती। शुभ्रपद्मं ध्वजसंकेतः। रथायुधौ पद्म-कल्हारौ । वीरघण्टः चन्द्रातपः। सम्मुखद्वारे पञ्चलताकार-चित्रम्। रथाधिश्वरौ सुभद्रा-सुदर्शनौ । उत्सवमूर्तिः जयदुर्गा । गंगा-यमुने द्वारपाले । सारथिः अर्जुनः । रोचिका-मोचिका-जिता-अपराजिताः चतस्र अश्वाः रक्तवर्णाः । स्वर्णचूडः रथरज्जुः । विमला- दुर्गा- वाराही - चामुण्डा-भुवनेश्वरी-हरचण्डी-जयदुर्गा-सर्वमंगला-उग्रताराः नव-पार्श्वदेव्यः रथस्य। भृगु-सुप्रभ-वज्र-शृंगि-ध्रुवाः रथ-ऋषयः । मनोरमा-तिलोत्तमे प्रतिहारे । रथरक्षके उग्रचण्डा-चन्द्रघण्टे। रथपालो हरिहरः। रथाधिपा वनदुर्गा । रथदेवता महामंगला। रथदेवी चन्द्रघण्टा। भैरवो घण्टाकर्णः । यक्षः किञ्वल्किकः । गन्धर्वः हा हा । एताः देवताः देवदलने विराजन्ते तराम् । अलं पल्लवितेन। जय जगन्नाथ।

## सिद्धार्थमार्गः

-लेखकः - आचार्यः पि.वरप्रसादमूर्तिः

ॐ नमो भगवते सिद्धार्थाय

अथ अपारे आपातरमणीये संसारे जनाः मोहमायामग्नाः सन्तः जनन-मरणचक्रबद्धास्तिष्ठन्ति। परं विरलास्तु कारणजन्मानः महात्मानः –

"वयं कस्मादिह समागतवन्तः?"

"किं दृश्यमानमिदं जगत् शाश्वतिकम् उत तात्कालिकम्?"

"भौतिकजीवनादतिरिक्तं परं किम् अस्ति?"

इत्यादिप्रश्नान् समाधातुं यतन्ते, क्षमन्ते च। तथा लोकान् समुद्धर्तुं भुवम् अवतीर्णवन्तु महात्मसु विशिष्टः भगवान् सिद्धार्थः।

किञ्च अश्वघोषमहाकविः बुद्धचरिताख्ये महाकाव्ये –

"दुःखार्तितानां भुवि एष त्राता।" इति

"देवा ननन्दुर्विगतेऽपि रागे मग्नस्य दुःखे जगतो हिताय।"

इति च बुद्धजननवृत्तान्तं समुपवर्णयति।

भगवता बुद्धेन चत्वारि आर्यसत्यानि प्रतिपादितानि।

तानि क्रमशः – 1. दुःखम् अर्थात् जीवनं दुःखमयम्

2. दुःखं कारणसङ्गतम् 3. दुःखनाशः सम्भवः

4. दुःखनिरोधः

एतस्मिन् आर्यसत्यचतुष्टये एव बौद्धदर्शनसारः निहितः तिष्ठति। एतार्यसत्यचतुष्टयं सार्वत्रिकं, सार्वकालिकञ्च समुल्लसति।

अथ महावैशाख्यायां बुद्धपूर्णिमायां पुण्यतिथौ–

"बुद्धं शरणं गच्छामि।

धर्मं शरणं गच्छामि।

संघं शरणं गच्छामि।"

इत्येतानि त्रीणि वाक्यरत्नानि सर्वैः पौरैः स्मरणीयानि, मननीयानि च।

"बुद्धं शरणं गच्छामि" इत्यस्य भगवता बुद्धेन मानवीयकल्याणाय, दुःखापनोदनाय च समुपदिष्टं मार्गं शरणं गच्छामीति वाक्यार्थः सिद्ध्यति।

"धर्मं शरणं गच्छामि" इति द्वितीयं वाक्यरत्नम्। धर्मानुष्ठाने एव लोकश्रेयः निहितमस्ति। भारतीयसंस्कृतिः विश्वे मकुटायमानं स्थानम् अलङ्करोतीत्यत्र धर्मः अस्याः संस्कृतेः मूलस्तम्भत्वेन विराजते।

"धर्मेण हीनाः पशुभिः समानाः" इत्येतत्सुभाषितं सदा स्मर्तव्यम्। धर्माचरणे एव स्वकल्याणं, संघकल्याणञ्च परस्परं संयोजितम् अस्तीति ज्ञातव्यम्।

"संघे शक्तिः कलौ युगे" इत्येतत्सुभाषितं सर्वदा स्मरन्तः पौराः स्वार्थं परित्यज्य परार्थाय यतेरन्।

भगवता बुद्धेन समुपदिष्टेषु सिद्धान्तेषु श्रद्धा-भक्ति-विश्वासान् प्रकटयन्तः पौराः समाजे प्रशान्तं जीवनं यापयेयुः इति शम्।

आचार्यः पि.वरप्रसादमूर्तिः,
रेक्टर, आचार्यनागार्जुनविश्वविद्यालयः,
गुण्टूरु, आन्ध्रप्रदेशः

# श्रीरामकृष्णपरमहंसदेवस्य साधननिष्ठा



नारदोपाध्यायः

बङ्गालस्य शस्यश्यामलस्वर्णभूमिः श्रीरामकृष्णपरमहंससदृशं सुपुत्रं प्राप्य, स्वस्नेहमयाङ्के निवेश्य पालनपोषणं विधाय च धन्या पुण्यवती च जातास्ति । परमहंसः रामकृष्णः न केवलं भारते हि, अपितु अमेरिका, यूरोप, एशियादीनां महत्सु खण्डेषु अविद्यान्धकारं भारतीयधर्मवेदान्तज्योतिषा दूरीकृत्य शुद्धात्मरसास्वादनं कारितवान् । मानवमात्रस्य कृते मानवतायाः समुत्थाने एतत् परमहंसस्य महत् योगदानं वर्तते । ईश्वरीयस्य शक्तिरूपस्य उपासकेषु परमहंसरामकृष्णस्य नाम सर्वोपरि वर्तते । सः महाभागः महासाधकः, अनुभूतिजन्यात्मज्ञानस्य महान् पण्डितः एवञ्च आत्मदार्शनिकः आसीत् । भौतिकता, वैषयिकसुखभावनादिकञ्च तं स्प्रष्टुमपि नाशक्नोत् कदाचिदपि । तस्य महती इच्छा यत् सः सर्वदा जगदम्बायाः भक्त्यां हि निमग्नः तिष्ठेदिति ।

साधनकालस्य प्रसङ्गोऽयम्, यत् कदाचित् गङ्गातटं गतः सः एकस्मिन् हस्ते मृत्तिकाम्, अपरस्मिन् हस्ते च स्वर्णम् आदाय विचारितवान् – स्वर्णं मृत् अस्ति, मृत् च स्वर्णमिति ; यदा द्वयोरेव एकरूपता जाता तदा तद्वयमपि गङ्गादिशि निक्षिप्तवान् । ततः भगवतीं पार्वतीं प्रार्थितवान् – ?हे अम्ब ! मन्मनसि भौतिकसम्पदः विषयसुखस्य च मनागपि कामना नास्ति, मम प्रबलेच्छा यत् भवती मम हृदये सदा निवासं कुरु ? इति ।

परमहंसेन समस्तधर्माणां मूलभूततत्त्वं भगवतीमहाकालीरूपत्वेन जनान् प्रादर्शयत् । वस्तुतः सर्वधर्ममान्तरादिकम् एकस्य हि ईश्वरीयधर्मस्य विविधानि अङ्गानि वर्तन्ते । परमहंसदेवस्य पूर्णतः विश्वासः यत् लघुगुर्वादिषु सर्वेषु वस्तुषु एकं हि भागवतज्योतिः विद्यमानं वर्तते । प्राणिमात्रस्य हृद्देशे तत् परमात्मज्योतिः अपश्यत् महोदयः । अतः बालः वयस्कः वृद्धः पुरुषः महिला पशुः इत्यादीन् सर्वान् सः स्वस्य उपास्यत्वेन हि अमन्यत ।

परमहंसदेवः शिष्यान् अबोधयत् यत् कलियुगे मानवार्थं भक्तिमार्गः प्रेममार्गः वा हि सुगमः वर्तते । भगवन्नाम सदा जपनीयम्, भगवतः गुणगानञ्च करणीयं सदा ।

एकदा परमहंसः भगवत्याः काल्याः दर्शनार्थम् अत्यन्तं व्याकुलः जातः आसीत्, परन्तु बह्वपेक्षानन्तरमपि यदा तद्दर्शनं न जातं तदा सः स्वप्राणान्तर्थं सहसा उद्वेगेन खड्गहस्तः अभवत् । तत्समये झटिति जगदम्बायाः साकारविग्रहः तस्य पूरतः आविर्भूतः, अनेन दर्शनेन सः शान्तचित्तः कृतकृत्यश्च अभूत् । दुर्लभः मनुष्यजन्म प्राप्य एतदेव मनुष्यस्य कृते मूलावश्यकता यत् कथं प्रभुचरणे प्रीतिः भवेदिति, शम् ।

# विविधपद्यत्रयोदशी



**शिखरिणी**
मनोज्ञन्ते रूपं मुदितमनसाहं हृदि दधे
कृपापूर्णा दृष्टिर्भवतु मयि मातस्तव सदा ।
विचिन्त्यो नैव स्याङ्कथमपि कथावाचनविधौ
मतिर्मे गच्छेन्नो क्वचिदपि कुमार्गे कथमपि ॥।

**पृथ्वी**
चकार चतुराकृतिञ्झटिति या मनोभीप्सितां
चकर्ष बहुधा मतिं विविधकाकुवाक्याङ्कुरैः ।
जहार मम हृद्गतं यदपि भावपूर्णस्थलं
सदा ! हृदयहारिणी भवतु सा मनोरञ्जिनी ॥

**हरिणी**
मधुरसयुजां पुष्पाणां वै सदा भ्रमरा इमे
विभवरसिका भोक्तारोये ! भवन्ति न तच्चिरम् ।
प्रभवति यदा मूर्खः कश्चित् सुधाङ्गनसंगतः
भवति विदुषां नूनं विद्यावतां कठिना स्थितिः ॥

**भुजङ्गप्रयातम्**
महेशं विना कीदृशी शैलपुत्री
दिनेशं विना कीदृशं जीवनं वै ।
विना वारिदं कीदृशं शस्यजातं
विना संस्कृतं भारतं कीदृशं स्यात् ??

**स्रग्विणी**
द्वेषता वर्धते हीयते साधुता
नैव गृह्णाति शिष्टाज्जनात्प्रेरणाम्।
सर्वथा सर्वदा दृश्यते भिन्नता
ह्येकता नास्ति वृन्दे कथम्बन्धवः??

**वसन्ततिलका**
प्रातः समुत्थितजनः प्रथितस्ववृत्तौ
वेलां न काञ्चन पुनर्लभते हि मध्ये ।
कार्यङ्करोति श्रमिकस्सततं दिने भोः
श्रान्तिं निशैव हरते+नुदिनं जनानाम् ॥

**वंशस्थ**
न कोपि ग्रन्थः पठितस्त्वया यदि
न चापि काव्यं रचितं मनोहरम् ।
स्मृतो हरेर्नो महनीयविग्रहो
मुधा गतं ते भुवि मित्र जीवनम् ॥

**शालिनीम्**
श्रद्धाशीलस्सात्विकोऽयो मनुष्यो
ज्ञातास्वादो भक्तिभावैः सुखस्य ।
चित्तं लोके नैव युक्तं कदाचिद्
यत् संलग्नं पूर्वतो ब्रह्मणा वै ॥
जातो रामो मत्सखस्सर्वसिद्धो
जाता सीता मत्सखी सर्वसिद्धा ।
जातो दासस्सर्वथाहन्तयोर्वै
मुक्तिर्नूनङ्कल्प्यते तेन मह्यम् ॥

**मालिनी**
सपदि हृदयजातं भावमासाद्य सर्वं
विदधति बहुमानं कार्यमात्रं यदिष्टम् ।
प्रकृतमनुसरन्तश्श्रेष्ठगण्या मनुष्याः
सहृदयहृदि सन्तो वै सुहृद्देवकल्पाः ॥
अभिहितपरिभाषञ्छन्दसां लक्षणं यत्
नननननननानेत्येकवर्णेन युक्तम् ।
भवति हृदयपीठे चेन्न कष्टं हि किञ्चित्
स्फुरति सपदि वृत्तं सर्वथा सारभूतम् ॥

**स्रग्धरा**
श्रद्धावाञ्चेत्सदा त्वं शशिकिरणयुतो सर्वभूतिप्रदाता
नूनन्तुभ्यम्प्रयच्छेत्सकलविभवयुक्तन्नृणां यद्धि सत्वम् ।
भक्तिस्ते निश्छला स्यात्तदनुगुणभवा या महेशप्रियाये ।
सेवाभावैः समन्तात्समधिगतशिवः प्राप्नुयात्तत्पदं वै ॥

**मन्दाक्रान्ता**
कश्चिद्बालो हरिहरगुरुश्रद्धया सेवमानो
ज्ञानम्प्राप्तुं भवति नितरां श्रद्धानस्सदैव ।
आचार्योपि प्रगतिपथगं छात्ररूपन्नु बालं
स्निग्धैर्भावैर्वदति बहुधा शास्त्रतत्वं समग्रम् ॥

डॉ. संजीतकुमारझा
सहायकप्राध्यापकः (संस्कृतविभागः)
सी. एम. कॉलेज, दरभङ्गा, बिहारम्

# पद्यरचनकार्यशालाप्रशस्तिः

-अरविन्दः

आदावार्या सुकविगृहिणी शालिनी मालिनी वा
काले+नुष्टुप् तदनु रुचिरा चेन्द्रवज्रा मनोज्ञा।
शिलष्टा रम्या प्रियशिखरिणी स्रग्विणी चुम्बिताभून्
मन्दाक्रान्ता हृदयनिहिता दण्डकश्चण्डवृष्टिः।। १

उपेन्द्रवज्रा तिलकावसन्तो रथोद्धता तोटकनामबोध्यम्।
तथेन्द्रवंशा ह्युजातिरासीत् ततश्च वंशस्थमिदं प्रियं नः।। २
एकविंशतिसद्वृत्तै रचिता नवमालिका।
अर्पिता कार्यशालायां सौरभं सारयेत् सदा।। ३

सानन्दं प्रतिभागिभिर्दशमितैः सायन्तने प्रत्यहं
साकं सस्वरमादरेण पठितं छन्दोविधानं ध्रुवम्।
यद्वाऽन्तः स्फुरतीव सद्गुरुकृपालब्धं द्रुतं बोधितं
संसृष्टा सफलाद्य पद्यरचनाश्रीकार्यशालाऽभवत्।। ४

वन्दे कविं सपदि मङ्गलदं गणेशं
विद्वत्कुलेन्द्रमधुना बरखेडिवर्यम्।
मित्रं धनंजयमहं श्रुतशास्त्रलीनम्
आयोजकानभिनवान् कविकर्मदक्षान्।।५

# मित्र-पञ्चकम्



-डॉ.शशिकान्तशशिधरः

यन्मैत्रीं सुविचार्य नैजसमतायां केवलं साधयेद्
दृष्ट्वा दुःखभरं स्वमित्रमिह यद्दुःखान्वितं सम्भवेत्।
नैजं मित्रमहो सदात्मसदृशं प्रीत्यन्वितं मन्यते
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।01।।

कष्टं स्वीयबृहत्तमं भवतु चेज्जानातु साधारणं
सामान्यं विपदोपि यो गिरिसमं मित्रस्य सञ्चिन्तयेत्।
यन्मित्रं कुपथो निवार्य सुपथं शुभ्रं सदा प्रेरयेत्
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।02।।

साहाय्यं विदधात्वहर्निशमहो मित्रस्य यत्सर्वतः
शंकामुक्तविचारयुक्तमनसा मित्रेण सार्धं वसेत्।
नित्यं दुःखसुखे जयाजययोर्मित्रन्न यत्सन्त्यजेत्
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।03।।

यत्स्वप्नेपि च दम्भचौरनिकरम्मित्राय नो चिन्तयेत्
शुद्धान्तःकरणेन शुभ्रमनसा मित्रं स्वकं सम्मिलेत्।
स्वाम्मैत्रीञ्च सुदामकृष्णसदृशं चित्तेन यद्भालयेत्
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।04।।

विश्वासस्य सुकोमलं प्रियतमं सद्बन्धनं मित्रता
साक्षात्यागतपस्ययोर्भुवि शिवा दृष्टान्तता मित्रता।
दृष्टौ यस्य जगत्सुसारममृतं सम्वर्तते मित्रता
श्रेष्ठं सच्छुधियो वदन्ति सततं मित्रोत्तमं तद्भवेत्।।05।।




# भाषाशास्त्रीयसंस्कृतश्लोकशतकम्

-डा.प्रमोदकुमारशर्मा (शास्त्रकविः)
एसोसिएट प्रोफेसर,
संस्कृतमेवम्प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयो नवदेहली - 110067

नितम्बिनीभिस्तु समादृता भृशं रशत्यवश्यं रसना सकिंकिणी।
स्वरश्मिभिर्नेत्रसुखप्रदैरियं करोति राशिं सहसानुरागिणाम्।।१।।
आयातु त्वरते सदा न किमुषा प्राक्सूर्यमभ्रम्प्रिया
किं वा स्वीयगभस्तिभिर्न नितरां भास्वान् सदा त्वेषते।
रात्रिः किं त्सरतीह वा न कुटिला चन्द्रोदयाकांक्षिणी
बद्धास्सन्ति समे सदैव नियतं देव्या प्रकृत्याह्वया।।२।।
नदीं तितीर्षुर्नु गाहते जलम्प्राक्स्नानमम्भःपरितोपि गाहते।
स गाहमानश्च ततोवगाहते विगाहते सुष्ठ्ववगाहते पुनः।।३।।
कुपथा सुपथा वोपि भवेयं द्रव्यवाहनम्।
इति मत्वैव नेतोसौ त्रन्दति द्रव्यमर्जितुम्।।४।।
हंसोऽयं सुरभारतीम्प्रतिदिनं संसेवते स्वेच्छया।
ह्येकस्मिन् दिवसे सुरम्यतरले लब्धावकाशःपुनः।।
अत्रोत्साहतरंगपूर्णमनसा पद्भ्यां जले शीतले।
चौकाकी रमते स्वयं न कुरुते किञ्चिद्भयञ्चात्मनि।।५।।
शान्ते स्वच्छे तडागेऽस्मिन् सरस्वत्यास्सुदर्शिते।
हंसस्येयञ्जलक्रीडा प्रसन्नस्य विलोक्यते।।६।।
विना संकोचेन स्फुटितविविधोमंगभरिताः।
जनास्स्नेहाधिक्यात्स्वजनशरणं यान्ति परितः।।
अतीवोत्साहेन प्रतिजनमनश्च प्रतिगृहम् ।
सहर्षं रागाणां रमणमधुरम्पर्व घटते।।७।।
शब्दविद्यामधीत्यैव सर्वविद्यासमागमः।
प्रधाने च कृतो यत्नः फलवान् भवतीत्यतः।।८।।
अयि! चिरपरिश्रान्त! विद्याकान्तारचारिणे।
नित्यम्प्रदास्यते तुभ्यं विद्यादुग्धामृतम्महत्।।९।।
तबलीकीजमातस्य मरकजप्रशिक्षिताः
कोरोनासम्प्रसारार्थं कत्रयन्तेधमा नहि।।१०।।
तेषां नियन्त्रणं कर्तुमादित्यनाथयोगिना
मध्युत्तरप्रदेशम्प्रशासनं नैव कत्रते।।११।।
परस्परम्मिथो दूरं स्थित्वा मानवा यदि
वर्तिष्यन्ते तदा नूनं कोरोना कत्रयिष्यते।।१२।।
पतिप्रेम्ण्यासक्ता पतिविरहदग्धा कृशतनुः।
विना भर्तारं सा रहसि विकला काष्ठचयने।।
नवेयम्भार्या ते कमलमिव हा तस्यति सखे!
कथं त्वं व्यर्थं भोः! कठिनतपसि क्वासि रमसे।।१३।।
लम्बत्सपिङ्गलजटामुकुटोत्कटाय,
दंष्ट्राकरालविकटोत्कटभैरवाय।
व्याघ्राजिनाम्बरधराय मनोहराय,
भूयान्नमः परशुराममहर्षये नः।।१४।।
विना शुल्कं समाप्नोति प्राणवायुञ्च विष्टरम्।
ग्राम्यो जनः सखे! तस्माद्धन्यं ग्रामीणजीवनम्।।१५।।
आतो धातोस्सूत्रम्भङ्क्त्वा पतञ्जलिना समाहितम्भाष्ये।
हाहा,हाहे,हाहः,हाहि,क्वचित् पाणिनेः त्तवः, श्नः ।।१६।।
सिंहेन खाद्यमानोऽसौ 'अ अ' इत्युक्तवानृषिः ।
तदेव पाणिनेरन्त्यं मन्यन्ते वचनं बुधाः ।।१७।।
प्रथमं लुप्तषष्ठीकं द्वितीयम्प्रथमान्तकम्।
पदद्वयात्मकं सूत्रम् 'अस्य अः' इति रूपकम्।।१८।।
पातञ्जलम्महाभाष्यं यावन्नैवावलोक्यते।
कथं तावद्विजानासि 'अ अ' सूत्ररहस्यकम्।।१९।।
कःपाणिनीयसूत्राणि कठिनानि पठिष्यति।
मत्वेति पाणिनिं सिंहो जग्रसे सरलं स्वयम्।।२०।।
जग्रहे पाणिनिं सिंहः किन्तु व्याकरणं न सः ।
जयन्त्यद्यापि सूत्राणि पाणिनीयानि भूतले ।।२१।।
सायं प्रातः केकानादः
रात्रौ दिवसे मेघाच्छादः।
जेएनयूपरिसरे समस्ते
नवो नवोऽयं वर्षास्वादः।।२२।।
वायुर्वाति मनोरमभिन्नः।
देहःक्लिन्नो वस्त्रं क्लिन्नम्।
वृक्षगुल्मलतादिसमेषा
मौष्ण्यं गतम्मनःप्रसन्नम्।।२३।।

शेषभागःसप्तमपुटे

षष्टमपुटस्य शेषभागः

# भाषाशास्त्रीयसंस्कृतश्लोकशतकम्

प्रदूषयन्तो भृशमन्तरिक्षं स्वास्थ्यञ्जनानामवहेलयन्तः।
यानस्वरैःकर्णकटुस्वनैश्च कथङ्घवन्ते जनताहितैषिणः।।२४।।
द्विवचने पुनीतोऽयम्पाणिनीयःप्रयुज्यते।
पुनीतमपशब्दोऽयमेकस्मिन् वचने सदा।।२५।।
मुखात् सिंहस्य सूत्राणि मुनेः श्रुत्वैव पाणिनेः।
सर्वे प्राहुः समायातो वैयाकरणकेसरी।।२६।।
मुखात् सिंहस्य सूत्राणि श्रुत्वातिविस्मयं ययुः।
वेदान्तिनस्तदा प्राहुस्सिंहोऽयं न तु पाणिनिः।।२७।।
] राजनैतिकलाभाय श्वेतवस्त्रावृताऽधरा ।
जयश्रीरामघोषेण बंगे क्रुध्यति का? सखे ! ।।२८।।
अहंतां ममतां त्यक्त्वा विचार्य मनसा सह ।
मतं ते श्रोतुमिच्छामि प्रश्नस्य देहि सूत्तरम्।।२९।।
बुङ्गन्ति जन्मना केचित् केचिद् वातार्दिता अपि।
उक्षाणोऽपि च बुङ्गन्ति भारतीयास्तु केवलम्।।३०।।
व्युत्पत्तिं तर्कशास्त्रञ्च यस्तु बोधति तत्त्वतः।
सैव बोधति साहित्यं न कश्चिल्लेखनीग्रहः।।३१।।
देवन्ते त्रिदिवौकसोऽपि नितरां भाग्येन पुंसामिह।
चारित्र्येण च सुष्ठु साधु पुरुषः स्वं जीवनं दायति।।
सिद्धान्तान् प्रतिपक्षिणो द्यति सदा तर्कैस्तु वाग्मी नवैः।
सत्ताञ्च द्यति कञ्चिदेव समयं भानोरयं वारिदः।।३२।।
नाथन्ते नितरां विनम्रशिरसो देवास्तु शक्रादयः।
यामाद्यामिह शान्तिसौख्यसहितां काञ्चित्कृपां नित्यशः।।
सा माता मम वृत्तिदानविषये दत्वा वचांस्याशिषाम्।
कृत्वा मां पुनरात्मनिर्भरमहो लोकत्रये नाथते।।३३।।
यः काष्ठानीव नशशत्रून्नित्यम्भर्वति देहगान्।
देवो यज्ञस्य तम्भक्त्या वह्निं वन्दे पुरोहितम्।।३४।।
अधमाः स्वार्थसिद्ध्यर्थं पीडयन्ति महात्मनः।
क्राइष्टं किं पुरा क्रूसे ब्रूसयन्तेस्म नाऽधमाः।।३५।।
निष्ठावानपि नास्ति यः परवचःश्लाघासु वाचंयमः।
काव्यानि प्रकरोति यः स्वयमपि श्रीशारदातुष्टये।।
लक्ष्मीश्चापि पदं दधाति कृपया गेहे पुनर्यस्य सः।
जानात्याद्रियते बुधन् बुधगुणान् नान्यो वराकःक्वचित्।।३६।।
यो ना नो दयते कदापि दयितां निन्द्यो ध्रुवं जीवने।
क्वाचित्कीमपि शान्तिमेति नहि सोऽशान्तो दरिद्राति च।।
वज्रीभूतममुष्य हृद् दलति तन्नावाप्य सत्सेवकम्।
चिन्तामर्षभयादिरोगनिचयास्तं दालयन्ति क्षणात्।।३७।।
मन्थानेन सदैव गोपकुलजा मन्थन्ति दुग्धं दधि।
सम्प्राप्ते द्विषतश्च सुष्ठु समरे मथ्नाति सूरो जनः।।
शास्त्रज्ञश्च सुधीजनःकथयते शास्त्रम्मथित्वा पुनः।
साधूनामपि यो मनांसि नियतम्मथ्नात्यसौ मन्मथः।।३८।।
माता पोषति शैशवे स्वजनितं लोके न्वकिञ्चित्करम्।
तं बालं सततञ्च पुष्यति पिता पित्रोः सदानन्ददम्।।
विद्यादानविवर्द्धनेन गुरवः पुष्णन्ति यं यौवने।
पित्राचार्यकृपाभिवृद्धवपुषं तं पोषयन्ते जनाः।।३९।।
वर्षाहेतुरयं निदाघसमयो दघ्नोति जीवान् समम्।
वर्षा दण्डयते भृशं पुनरमुम्मेघैःसमं विद्युता ।।
सर्वेभ्यो ददते सुखं च दधते सम्पत्तिमेवं शरद्।
सौरभ्यं ददते प्रियाणि दधते जीवेभ्य एषःक्रमः।।४०।।
रटन्ति न व्याकरणस्य सूत्रं कोशं न वा येऽपि रठन्ति कञ्चित्।
लटन्ति नूनं विदुषां समाजे रणन्ति ते नूपुरवन् नितान्तम्।।४१।।
ये पर्चयन्ति नितरान्निजकृत्यजातं
पर्चन्ति धौतवसनं दशनञ्च केशम्।
पर्चन्ति ते सततमात्मनि लोकदृष्टिं
किम्पर्चिता न सुतरामिह भद्रलोकैः।।४२।।
आषाढ़स्य प्रथमदिवसे मेघमालोक्य कश्चिद्
यक्षःकान्ताविरहजनितां स्वात्मनो गुप्तवार्तां।
नेतुं श्यामं नयनसुखदं श्रद्धया संययाचे
कामार्तो हि प्रकृतिकृपणश्चेतनाचेतनेषु।।४३।।
दिव्यस्स वर्तते ह्युष्ट्रः
राजस्थानविभूषकः ।
स्वयम्पिपासितश्चापि राजस्थानविनायकः ।।४४।।
अयञ्जीवो महाकायस्सैनिकानां कृते सदा।
भारतस्य च सेनायाः रेगिस्तानेस्ति तारकः।। ४५।।
पंचमेन च पादेन घर्षणं प्रकरोत्ययम्।
पादप्रहारमात्रेण शत्रून्नाशयति स्वयम्।। ४६।।
अयं प्राणी विशालोस्ति राजस्थानस्य पालकः।
शाकाहारी जलाहारी गृहत्यागी च वर्तते।। ४७।।
अयं हि स्वस्य देहेस्मिञ्जलापूर्तिकरस्सदा।
ईर्ष्याद्वेषविहीनत्वात् संस्कृतकाव्यहेतुकः ।।४८।।
पिपर्ति वत्सञ्च घटम्पृणाति स्वस्वामिनो नित्यमसौ पयोभिः।
तृणादिभिः केवलमेव तुष्टा
न गौः कदा पारयते जनेच्छाम्।।४९।।
घ्रात्वा व्याकरणन्निशम्य सहसा मीमांसकीयम्मतम्।
काणादं सह गौतमीयविषयैस्स्पृष्ट्वा पुनर्हेलया।।
द्वित्राण्येव दिनानि सुष्ठु गगने दृष्ट्वा ग्रहादिस्थितिम्।
श्रीमद्भागवतम्पुराणमधुना दिव्यो जनस्स्वर्दते।।५०।।
शास्त्रेषु ये वानरवत्प्रवन्ते सदैव युक्त्या च पदं लभन्ते।
परोपकारे जडताम्भजन्ते त आगता वानरमिश्रपादाः।।५१।।
पादाभिवन्दनविधौ चरणौ स पृक्ते
मातुःपितुर्निजगुरोर्नियतम्प्रभाते।
तत्कर्मजातफलमीदृशमस्ति येन
कीर्त्या सुखेन वसुनाऽपि पृणक्ति नूनम् ।।५२।।
जना उच्यन्ति यस्मिंस्तद् गृहमोकः प्रकीर्तितम्।
विद्वांसो नैक्यमायान्ति मूर्खा उच्यन्ति शीघ्रतः।।५३।।
चेलीयम्भृतिदान्तु चेलति यथा चेलो गुरुञ्चेलति।
चाटूक्तौ निपुणो जनोऽग्रिमपदम्प्राप्तुं सदा चेष्टते।।
रोगी च्यावयते वचांसि भिषजान्तथ्येन हीनान्यपि।
कामार्तश्च्यवते पथः कृतधियाञ्जानन्नसत्सत्तथा।।५४।।
प्रातः प्रातर्ध्वनिं श्रुत्वा कुक्कुटस्य महामुनिः।
ह्रस्वदीर्घप्लुतास्संज्ञा रचयामास पाणिनिः।।५५।।
दयालुःपाणिनिस्तस्य व्याकरणञ्च निर्मलम्।
लघूनि सन्ति सूत्राणि पाणिनीया दयालवः।।५६।।
अष्टाध्यायी जगन्माता वर्तते पाणिनेर्मुनेः।
शिष्या मूर्धन्यविद्वांसस्संस्कृतस्य पितामहाः।।५७।।
श्रुतिस्संरक्षिता चैव पाणिनीयैर्मनीषिभिः।
स्मृतिस्संपालिता नूनं धातुसूत्रगणादिभिः।।५८।।
पाणिनिप्राक्तनैश्श्रेष्ठैःपूर्वजैर्गुरुभिस्स्वयम्।
पालिता रक्षिता सैव पाणिनिना विवर्द्धिता।।५९।।
पाणीनीये च किं नास्ति व्याकरणे मनोहरे।
वैदिका लौकिकाश्चापि प्रयोगास्साधितास्समे।।६०।।
मेघसंघर्षणाज्जाता प्रलयंकारिणी द्रुता
आकाशात्पतिता विद्युज्जनानां घातिकाऽभवत्।।६१।।
शाब्दिकानां विवादो न कश्चिच्छब्देषु वर्तते।
नित्याश्शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।।६२।।
वाचो बाणेन को लाभो भौतिकेन शरेण वा।
नाविध्यत् पाणिनिस्सिंहं हिंसकं बलवानपि।।६३।।
कुचमर्दनकारोऽपि रसिको नहि शाब्दिकः।
केन शाब्दिकसिंहेन कस्याः मर्दितौ कुचौ।।६४।।
अन्यथा मर्दनं कुर्यात् सूत्राणां न कुचस्य तु।
सूत्राणि नहि दृष्टानि कुचमेवाभिमर्दितम्।।६५।।
काशिका कौमुदी चापि सिद्धान्तानां प्रकाशिके।
ये ते नैव तु जानन्ति ते संघर्षणकारिणः।।६६।।
महाभाष्ये विभागोऽस्ति सूत्राणां न तु मर्दनम्।
शाब्दाधिक्यावबोधःस्यात्सर्वेषां मतिधारिणाम्।। ६७।।
यत्नाधिक्ये महद्धि स्याद् गौरवं न तु लाघवम्।
तस्मात्पाणिनिना प्रोक्तं तत्सूत्रं नाऽज्झलाविति।। ६८।।
स्वामिभिःकरपात्रैस्तैश्शंकराचार्ययोगिभिः।
वैयाकरणधौरेयैः कस्याः भो मर्दनं कृतम्६९।।
पठन्तस्ते च सूत्राणि रटन्तःपाणिने! मुने!
क्षीयन्ते सर्वपापानि भिद्यन्ते सर्वसंशयाः।।७०।।
पठित्वा पाणिनीयानि सूत्राणि सर्वतस्सखे!
शाब्दिका मुख्यविद्वांसो भवन्त्यत्र न संशयः।।७१।।
श्रुत्वैव पाणिनीयानि सूत्राणि कोमला जनाः ।
धैर्यहीना भयग्रस्ताःपलायन्तेऽतिदूरतः।।७२।।
पलायध्वम्पलायध्वम्पाणिनीयस्य निन्दकाः।
व्याकरणस्य शास्त्रस्य ह्यन्यत्र क्षीणबुद्धयः।।७३।।
अष्टाध्यायीमहाभाष्यं सिद्धान्तकौमुदीं तथा।
विज्ञाय रच काव्यानि नैव भ्रष्टो भविष्यति।।७४।।
लघ्वर्थञ्चाध्येयं व्याकरणं पाणिनीयं हि ।
पतञ्जलेर्महर्षेरिति कथनम्भाष्यकारस्य।।७५।।
नूनम्फलमुखन्नैव गौरवं दोषमावहति।
धेनोःपादप्रहारोऽपि सहते ना यथा भुवि।।७६।।
लाघवं लाघवम् मत्वा गौरवं मनुते न कः?
लाघवश्शब्दशास्त्रे तु गौरवायैव कल्पते।।७७।।
दुग्धपूर्णपिचण्डस्त्वं किमशनासि तथा सुहृत्।
यथाऽशनायितोऽश्नाति योऽशनायाप्रपीडितः।।७८।।
सुद्ध्युपास्यपदे ये हि रमन्ते सज्जना बुधाः।
शाब्दिकास्ते हि कथ्यन्ते तरन्ति शब्दसागरम्।।७९।।
तपस्वी शाब्दिकोऽपृच्छत् सुद्ध्युपास्यं कदा प्रभो!
नेतुमायाति वैकुण्ठमेकधो वा द्विधोऽस्तु वा।।८०।।
सुद्ध्युपास्यःप्रभुर्लब्धो लाकृतिःराधिकापतिः।
साधितो मध्वरिस्सम्यक् पठता कौमुदीम्मया।।८१।।
वैयाकरणकवीनां प्रेमालापं सखे शृणु त्वमिमम् ।
खफछठथेति वदन्तं भार्या शषसर्हेलित्याह ।।८२।।
गृहीतस्सुद्ध्युपास्योऽयं हरिर्ध्यानेन चेतसि।
एकधो वा द्विधो वास्तु भेदो न ग्रहणे मम।।८३।।
उपास्यो गुरुभिःपूज्यैस्सुद्ध्युपास्यो गुरुर्महान्।
व्यासवाल्मीकिशब्दज्ञैरद्यापि समुपास्यते।।८४।।
शब्दव्युत्पत्तिमात्रेण सृष्टिस्सञ्जायते समा।
तस्मान्मूलं शब्दतत्त्वं सुद्ध्युपास्यङ्गुरुम्भज।।८५।।
सुद्ध्युपास्यान् गुरून्नत्वा मध्वरिर्लाकृतिर्हरिः।
साध्यते ह्यात्मना नित्यं वैयाकरणधीमता।।८६।।
सुद्ध्युपास्यं गुरुन्नत्वा स्मृत्वा च लाकृतिम्प्रभुम्।
मया शिष्यैरुपास्येन सुद्ध्युपास्यःप्रशिक्ष्यते।।८७।।
हरिः रामो हरीरामो हरौ रामोऽपि विद्यते।
शब्दोऽयं साध्यते सन्धौ मिश्रणाद्धरिरामयोः।।८८।।
ज्ञात्वैनञ्जननी प्राह शब्दशास्त्रस्य सम्मतम्।
हरे ! राम ! श्हरेरामः ! राम! राम! हरे! हरे! ।।८९।।
हरौ रामे गुरौ कस्य वराकस्य रुचिस्सखे! ।
विद्यते नहि कोऽयं? सः रावणो रौति भूतले।।९०।।
हिन्दुस्थाने ह्ययोध्यायामालयो रामालयः।
हरीरामस्य रम्यस्य निर्मीयते नवो न किम् ? ।। ९१।।
व्युत्पत्तिमभिजानामि प्रत्ययं धातुमेव च ।
न याति किन्तु मे दृष्टिमव्युत्पन्नो जनार्दनः।।९२।।
व्युत्पत्तिवादमात्रेण भट्टाचार्यो गदाधरः।
ज्ञात्वा सम्प्राप्तवाञ्छीघ्रमव्युत्पन्नञ्जनार्दनम्।। ९३।।
उपसर्गन् जानातु न धातुम्प्रत्ययन्तथा।
व्युत्पत्तिभिस्तु जानातु ह्यव्युत्पन्नञ्जनार्दनम्।।९४।।
व्युत्पत्तीश्च धातूँश्च त्यक्त्वा यस्य जनार्दने।
प्रत्ययस्तस्य मुक्तिस्स्याद्भजनीयो जनार्दनः ।।९५।।
नित्यानान्नामशब्दानामर्थवत्वात् सदा सखे!
प्रातिपदिकसंज्ञायां सुबुत्पत्तिर्भविष्यति।।९६।।
नित्याश्शब्दा न चोत्पन्ना धातवःप्रत्ययास्तथा।
कृत्तद्धितसमासाश्च सूत्रमेतन्निरर्थकम्।। ९७।।
किन्तु तद्धितशब्देभ्यःकृदन्तेभ्यश्च हे सखे!
धातुप्रत्ययजन्येभ्यस्सुबुत्पत्तिःकथम्भवेत्? ९८।।
तदर्थम्मुनिना यत्नः पाणिनिना प्रचोदितः।
व्युत्पन्नशब्दपक्षोऽपि स्वयमेव समर्थितः।।९९।।
अन्वाख्यानाय शब्दानां धातुप्रत्ययकल्पनाम्।
अनित्ये च पदे कृत्वा नित्यशब्दः प्रदर्शितः।। १००।।


## पाठकानां कृते सूचना

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्कः रु.४८०/- ( व्यक्तीनां कृते ) मनिआॅर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C ) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# गुरुपूर्णिमायां आचार्यस्य रसेन्दुवर्यस्य अध्यक्षतायां सामूहिकः यज्ञोपवीतसंस्कारः सुसम्पन्नः

विगतवर्षाणामिव अस्मिन् वर्षेऽपि विप्रबालकानां सामूहिकः यज्ञोपवीतसंस्कारः गुरुदीक्षाकार्यक्रमश्च भगवान्–परशुराम–ब्राह्मण–धर्मशालायां बदायूंनगरे रसेन्दुमहाराजस्य पावने सानिध्ये तेषां शिष्येण आचार्येण शब्देन्दुना मन्विन्दुना च वैदिकपरम्परया विधिवत्पूजनेन सह भिक्षाटनेन,काशीगमनेन इत्यादिभिः सम्पन्नमभवत्। यज्ञोपवीतसंस्कारात्पूर्वं विप्रबटुकानां मुण्डनं कारितम्। तदनु विधिविधानेन कौपीनम्,धौतवस्त्रं च धारयित्वा भगवतः गणेशगौरीसहितानां देवतानां पूजनं यज्ञकर्म च कृतम्। बटुकानां मातरः तथा च समाजसेविका रजनी मिश्रा,इन्द्राणी पाठक च बटुकेभ्यः भिक्षाप्रदानं कृतवत्यः। बटुकाः भिक्षां गृहीत्वा गुरुचरणेषु समर्पितवन्तः।



आचार्येण रसेन्दुना विप्रबालकेभ्यः कौपीनम्,धौतवस्त्रम्,चरणपादुका,स्वरचितं गायत्रीमहाशक्तिसाधनापुस्तकं च प्रदत्तम्। तदनन्तरं आचार्येण तेषां कर्णयोः गुरुमन्त्रः प्रदत्तः। ब्रह्मचर्यस्य शिक्षा,यज्ञोपवीतस्य महत्त्वम्,गायत्रीं वेदानां च सारतत्त्वं कथितम्।

यथा मधु च पुष्पेभ्यो घृतान्मण्डं रसात पयः।
एवं ही सर्व वेदानां गायत्री सार मुच्यते ॥

पुनश्च आचार्येण शब्देन्दुना सन्ध्योपासनविधेः आवश्यकता तत्महत्त्वं विप्रबालकेभ्यः अवबोधितम्।

विप्रो वृक्षस्तस्य मूलं च सन्ध्या
वेदशाखा धर्मकर्माणि पत्रंम् ।तस्मान्मूलं यत्नतोरक्षणीयं छिन्ने मूले नैव पत्रं न शाखा ॥

अवसरेऽस्मिन् अध्यक्षः कौशलानन्दपाण्डेयः,महामन्त्री अजय मिश्रः,कछला–महाविद्यालयस्य प्रबन्धकः अश्विनी कुमारः भारद्वाजः,अभयः भारद्वाजः,सञ्जयः पाठकः,सर्वेन्द्रः पाठकः,इन्द्राणी पाठकः,आयुषः भारद्वाजः, विप्रबालकानां मातरः पितरः,नगरस्य गणमान्याः जनाः अन्ये च शिष्याः उपस्थाय स्वीयं साहाय्यं प्रदत्तवन्तः।

# कीर्तिमानं प्राकृतभाषायां प्रकाशितं प्रथमसमाचारपत्रम्



यथि उदंतमार्तण्डः प्रथमहिंदीसमाचारपत्रं मान्यते यद्धि जुगलकिशोर सुकुलः 30/05/1826 तमे वर्षे कलकत्तातः प्रथमवारं प्रकाशितवान् संस्कृतभाषायाः प्रथमं समाचारपत्रं सुधर्मा श्री के.वी.संपत कुमारद्वारा 14 /07/1970, तमे वर्षे मैसूरतः प्रारम्भम् । तथैव प्राकृतभाषायां प्रकाशितं पागद भासा नामकं पत्रम् एतावता प्रथमः प्रयासः । एतत् भारतसर्वकारस्य समाचारपत्रपंजीयनकार्यालये प्राकृतभाषायाः प्रथमसमाचारपत्ररूपेण पंजीकृतम्। आरम्भे भारतसर्वकारस्य समाचारपत्रपंजीयनकार्यालयः अस्मै DELPRA00001सदृशं नाम (Title code) दत्तवान् यतः तेषां प्रदत्तानामँ आधारेण भाषायामस्याम् एतावता न किञ्चन समाचारपत्रस्य प्रकाशितम्।

प्राचीनभाषां प्रयासेन एतेन संरक्षितुं – प्रथमः अनुपमं प्रयासः कृतः। नव दिल्लीस्थिते श्री लाल बहादुर शास्त्री राष्ट्रियसंस्कृतविश्वविद्यालये जैनदर्शन विभागस्य आचार्य प्रो अनेकान्त कुमार जैनः अस्य संस्थापकसंपादकः वर्तते ।मीडियाक्षेत्रे भारतस्त्र प्राचीनभाषायाः प्राकृत इत्यस्याः प्रयोगः तया समाचारलेखन एतावता सर्वतः प्रथमघटना । एतदेव कारणं यद्विदुषां मध्ये प्राकृतस्य विभिन्नभेदानां क्रमे प्राकृतमपि चर्चयिष्यते ।अस्याः पत्रिकायाः प्रथमप्रवेशम् अंकं 13/04/2014 तमे वर्षे महावीरजयंतीदिने कुन्दकुन्द भारत्यां,नई दिल्ल्याम् आयोजिते एकस्मिन् समारोहे पूज्यः आचार्यः श्री विद्यानंदः, मुनिराजःआचार्य वर्धमान सागरश्च विमोचितवन्तः। षड्मासेषु प्रकाश्यमानसमाचारपत्रं जिनफाउंडेशननईदिल्लीतः श्रीमतीरुचि जैनद्वारा प्रकाश्यते । एषः एकः अव्यावसायिकप्रयासः सर्वेषां पारस्परिकसहयोगेन प्रकाश्यते । निःशुल्कं वितर्यते। अस्य डिजिटलप्रकारः सहस्रसंख्यायां देशे विदेशे च पठ्यते। । विश्वविद्यालयस्य प्रवेशपरीक्षासु प्राकृतभाषायां प्रकाश्यमानं सर्वप्रथमं समाचारपत्रं किम्? 'इति प्रश्ने सति अद्वितीयायाः ,प्राकृतभाषाया' च प्रथमसमाचारपत्रस्य महत्ता स्वयमेव ज्ञायते।

## उत्तराखंडसर्वकारस्य संस्कृतशिक्षाविभागस्य उपनिदेशकः डा० वाजश्रवा आर्यः 'संस्कृतिसेवा' इति सम्मानेन सम्मानितः



गुरुकुल –शिक्षा –पद्धत्या शिक्षां प्राप्तवन्तः डा वाजश्रवा आर्यः 2017 ईसवीये वर्षे उत्तराखंड लोक–सेवा–आयोगस्य पी.सी.एस. परीक्षां समुत्तीर्य वर्तमानसमये उत्तराखंड संस्कृत शिक्षा विभागे उपनिदेशकपदे कार्यरताः सन्ति।

उत्कृष्टवैश्विकसाहित्यिकसेवायै भारतीयसंस्कृतिसेवार्थन्यास हरिद्वारं, द यूनिवर्सिटी आफ फिजी, हिन्दी टाइम्स मीडिया टोरेंटो कनाडा,कम्युनिटी रेडियो फेडरेशन नई दिल्ली द्वारा डा. आर्यः संस्कृति सेवा सम्मान–2021 सम्प्राप्तः।

# पञ्चाब्दपूर्तिसमारोहावसरे श्रीरघुनाथकीर्तिपरिसरे समायोजिता उत्तराखण्डविद्यावैभवविषयिणी त्रिदिवसीया अन्ताराष्ट्रिया अन्तर्जालीया सङ्गोष्ठी

केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्री रघुनाथकीर्तिपरिसरेण अस्मिन् वर्षे स्वस्थापनायाः पञ्चवर्षाणि पूरितानिद्य अत एवास्मिन् अवसरे परिसरेण पञ्चाब्दपूर्तिसमारोहः समायोजितः। तदुपलक्ष्य 13 जुलाई तः 15 जुलाईपर्यन्तं समायोजिता त्रिदिवसीय अन्ताराष्ट्रिया अन्तार्जालीया सङ्गोष्ठी। अस्या सङ्गोष्ठ्याः केन्दीयो विषय आसीद् उत्तराखण्डविद्यावैभवम्। अस्य सारस्वत–कार्यक्रमस्य प्रथमे दिवसे उद्घाटनसत्रेण सह ज्योतिष–वेद–व्याकरणविषयाणाम्, द्वितीये दिवसे च साहित्य–दर्शन–आधुनिक विषयाणां विमर्श–रूपाणि व्याख्यानानि समायोजितानि। तृतीये च अन्तिमे दिवसे कविसंगोष्ठ्या आयोजनं सरसं मनोहरञ्च आसीत्। तत्र चोद्घाटनसत्रे प्रो.सुधारानीपाण्डेयमहोदया (पूर्वकुलपतिः, उत्तराखण्ड–संस्कृत–विश्वविद्यालयः, हरिद्वारम् तथा हेमवतीनन्दनबहुगुणा विश्वविद्यालयः, श्रीनगर, गढवालः), प्रो.सर्वनारायणझा (पूर्वकुलपतिः,



प्रो. सर्व नारायण झा डॉ.सुधा रानी पाण्डेय प्रो.बनमाली बिश्वाल डा.कृष्णकान्त कोटियाल डा.शैलेन्द्रनारायणकोटियाल

कामेश्वरसिंह–दरभङ्गा–संस्कृत–विश्वविद्यालयः, दरभङ्गा तथा निदेशकः, के.सं.वि.वि.लखनऊ–परिसरः), श्रीकृष्णकान्तकोटियालः (नगरपालिकाध्यक्षः, देवप्रयागः), डा.शैलेन्द्रनारायणकोटियालः (प्राचार्यः,श्रीरघुनाथकीर्ति–आदर्शसंस्कृत–महाविद्यालयः,देवप्रयागः), प्रो.बनमालीबिश्वालः (निदेशकः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः) समुपस्थितास्सन्तः सभामुद्बोधितवन्तः। प्रो.सुधारानीपाण्डेयमहोदयया उक्तं यद् उत्तराखण्डराज्यम् एतादृशं राज्यं विद्यते यत्र सर्वप्रथमं संस्कृतं द्वितीयराजभाषारूपेण स्वीकृतास्ति। प्राचीनकालादधुनापर्यन्तमत्रानेकेषां शास्त्राणां रचना विद्वद्भिः कृताः। अस्मिन् राज्ये विद्यमानस्य हिमालयस्य वर्णनं महाकविकालिदासेन स्वग्रन्थे कुमारसम्भवेपि कृतम्। प्रो.सर्वनारायणझामहोदयेन अत्र परिसरोद्घाटने कीदृश्यः समस्याः आसन्, तासाञ्च समाधानं कथं क्षेत्रीयजनानां सहयोगेन जातं तत्सर्वं निगदितम्। डा. कृष्णकान्तकोटियालः श्रीरघुनाथकीर्ति–आदर्शसंस्कृत– महाविद्यालयस्य सहयोगः अस्य परिसरस्य स्थापनायै कथं जातः, तद्विषये चर्चा कृता। परिसरस्य वर्तमान–निदेशकस्य कार्यकाले परिसरः समुचितां समुन्नतिं प्राप्नुवन्नस्ति इत्युक्तवान्। डा.शैलेन्द्रनारायणकोटियालेन प्रतिपादितं यत् अत्र गृहे गृहे देवानां वासो विद्यते। शास्त्राणां रचनाकारणात्, देवानां निवासाच्चेदं स्थानं देवभूमिनाम्ना ज्ञायते। परिसरनिदेशकेन प्रो. बनमालीबिश्वालमहोदयेनोक्तं यत् परिसरस्याभिवृद्धये वयमहर्निशं कार्यरताः स्मः। अस्य उत्तराखण्डप्रदेशस्य विद्यावैभवं सम्पूर्णे विश्वे लोकलोचने आनेतुम् अनुसन्धानाय विदुषः तथा छात्रांश्च प्रेरयामः। तदर्थं प्राथमिके स्तरे एषा त्रिदिवसीय अन्ताराष्ट्रिया अन्तार्जालीया सङ्गोष्ठी समायोजिता। अस्माकं सर्वेषामेतादृशेन प्रयासेन उत्तराखण्डस्य कीर्तिः इतोपि अग्रे संवर्धिष्यते। संस्कृतस्यात्र कथं विस्तारः स्यादिति अस्माकं मुख्यः प्रयासः वर्तते। उद्घाटनानन्तरं ज्योतिषविषयस्य चर्चासत्रमारब्धं तत्र ज्योतिषविषये उत्तराखण्डस्य विदुषां या ग्रन्थप्रणयनपरम्परा आसीत् सा विद्वद्भिः स्व–स्व–व्याख्यानेषु प्रस्तुता। तत्र च पं.विनोदबिजल्वाणमहोदयेन सिद्धिदात्रीपञ्चाङ्गस्य वैशिष्ट्यं प्रतिपादितम्। ज्योतिर्मठसंस्कृतमहाविद्यालयस्य प्राचार्येण ज्योतिषग्रन्थानामेका विस्तृतपम्परा विवेचिता। ततश्च वेदसङ्गोष्ठ्यां राष्ट्रपतिपुरस्कारसभाजितेन प्रो.वेदप्रकाशउपाध्यायेन वेदस्य माहात्म्यं उत्तराखण्डराज्यस्य प्रसङ्गे प्रस्तुतम्। तत्र च डा. सभापतिशर्मणा, वेदाचार्य–ज्योतिप्रसाद–उनियालमहदयेन स्वविचाराः प्रकटीकृताः। गुरुकुल–काङ्गडी–हरिद्वारात् प्रो.सोमदेवशतांशुमहोदयेन उत्तराखण्डस्य व्याकरणविषयेवदानं प्रस्तुतम्। तथैवात्र डा. शैलेशतिवारी–महोदयेन, प्रो. विजयपालशास्त्रिणा च व्याख्यानानि प्रस्तुतानि। तस्मिन् व्याकरण–सत्रे जर्मनीदेशीयेन क्रिश्चयनपीटरलोफरमहोदयेन व्याकरणविषये बनमालीबिश्वालस्यावदानं समासेन प्रस्तुतम्। एवमेव साहित्यसत्रे जर्मनीदेशतः संयुक्तेन प्रो.सदानन्ददाशेन प्रो.बनमालीबिश्वालस्य केदारायणमित्यस्य काव्यस्य वैशिष्ट्यं स्वव्याख्याने प्रतिपादितं यत्र उत्तराखण्डस्य सर्वविधं सौन्दर्यवर्णनमत्रद्भुतमस्ति। तत्रैव कुमांयूविश्वविद्यालयतः प्रो. जयातिवारि–महोदयया उत्तराखण्डे साहित्यस्य गौरवं कथं शोभते इति विचर्चितम्। उत्तराखण्डसंस्कृत–अकदमीतः प्रो.हरीशचन्द्रगुरुरानीमहोदयेनापि अस्मिन् विषये स्वविचाराः समुपस्थापिताः। दर्शनसत्रे दिल्लीतः संयुक्तेन उत्तराखण्डसंस्कृत–विश्वविद्यालयस्य पूर्वकुलपतिना प्रो.पीयूषकान्तदीक्षितेन उत्तराखण्डे विद्यमानानां संस्कृत–महाविद्यालयानां स्थितिः प्रस्तुता। दिल्लीत एव प्रो.शिवशङ्करमिश्रमहोदयः उत्तराखण्डस्य प्राचीनदर्शन–परम्पराविषये उक्तवान्। एवमेवाधुनिकसत्रेपि इलाहाबादविश्वविद्यालयस्य आङ्ग्ल–विभागस्य आचार्येण प्रो. सुशीलकुमार–शर्ममहोदयेन, प्रो.डी.आर. पुरोहितमहोदयेन तथा डा.जयन्ती–प्रसाद–नौटियाल–महोदयेन संस्कृत–मूलक–आधुनिकविद्यायाम् उत्तराखण्डस्य विदुषां कीदृशं योगदानं वर्तते इति गम्भीरा चर्चा विहिता। तृतीयदिवसे समायोजिते अन्ताराष्ट्रिये कविसम्मेलने सर्वादौ श्रुतिसंस्कृत्या, ततश्च डा. निरञ्जनमिश्र–डा. प्रकाशपन्त–डा.रामविनयसिंह–डा.कीर्तिवल्लभ–शकटा–डा. वीरेन्द्रसिंहवर्त्वाल–डा.मुकेसकुमार–चा. मनीषजुगरान–ड. प्रमोदभारतीय–डा.ब्रजेन्द्रकुमारसिंहदेव–डा.सुशीलप्रसादबडौनी–श्रीपङ्कजशास्त्री–हेमचन्द्र–वेल्वाल–राहुलपोखरियल–डा.कृपाशङ्करशर्म–डा.शैलेन्द्रप्रसाद–उनियाल– डा.अवधेशविजल्वाण– डा.अनिलकुमार–प्रभृतिभिः कविभिः देवभूमेर्देवमाहात्ममिति विषयमाधारीकृत्य काव्यपाठः कृतः। तैश्च कविभिः उत्तराखण्डस्य देवानाम् अतीवलालित्यपूर्णाः गौरवगाथाः गीताः। अस्मिन् अवसरे सर्वादौ श्रीरघुनाथवार्तावल्या नवनिदेशक–सपर्याविशेषाङ्कः अपि लोकाय अर्पितः। एतेषां सर्वेषां सत्राणां सञ्चालनं परिसरस्य विविध–प्राध्यापकैः कृतम्। अन्तर्जालमाध्यमेन च सर्वे प्राध्यापकाः छात्राः सम्पूर्णभारतस्य संस्कृतप्रेमिणो विद्वांसः अणुप्रणाल्या संयुक्ता आसन्। अस्य सम्पूर्णकार्यक्रमस्य फेसबुक्–मध्ये साक्षात् प्रसारणमपि जातम्।

अस्माकं प्रेरणास्त्रोतः– स्व.पं० रामकिशोरशर्मा,
परामर्शकाः–डॉ.रमाकान्तशुक्लः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी
सम्पादिका–मञ्जूशर्मा, सम्पादकमण्डलः– डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ–वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल–ऑफसेट–प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली–53तः मुद्रापयित्वा ए–2/32, वजीराबादमार्गः भजनपुरा, देहली–53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।